**Softcore**
**PHALITA JYOTISHA**

**ACHARYA I^st Year**
**Paper - V**

# SARAVALI

***( 1-6 Adyayas )***


## Directorate of Distance Education

Rashtriya Sanskrit Vidyapeetha
Accredited at 'A' level by NAAC
Tirupati - 517 507 (A.P.)

**CHIEF EDITOR**

Prof.V.MURALIDHARA SHARMA
Vice-Chancellor

**GENERAL EDITOR**

Prof.Ch.P.Satyanarayana

Director, DDE

**PROGRAME CO-ORDINATOR**

Dr.B.Chandrasekharam

**ADDITIONAL CO-ORDINATORS**

1. Prof.R.Deepta (Academic)
2. Dr.B.Chandrasekharam (Technical)

**SUBJECT CO-ORDINATOR**

Prof. R.J.Ramasree

**COURSE WRITER**

Dr.Keshav Mishra

**DIRECTORATE OF DISTANCE EDUCATION**
**R.S.VIDYAPEETHA,**
**TIRUPATI.**

# सारावली

**उपोद्घातः**

**ज्योतिषशास्त्रपरिचयः**

ज्यौतिषस्य वेदाङ्गत्त्वं निर्विवादम्। **विद्लृ ज्ञाने** इति धातोः निष्पन्नोऽयं वेदशब्दो ज्ञानस्य पर्यायिरूपः। वेदस्य मन्त्राः विश्वामित्रगृत्समदादिभिः ऋषिभिः साक्षात्कृताः न तु रचिताः, एतन्मतं पुष्णाति **ऋषयो मन्त्रद्रष्टारः** इत्यार्षवचनम्। कालक्रमेण वेदमन्त्राणां सम्यग् अवबोधनार्थं वेदरुपपुरुषस्य षड् अङ्गानि शिक्षा – कल्प –ज्यौतिष - छन्दो – व्याकरण – निरुक्तानि प्रवृत्तानि। अमून्यखिलानि षट्शास्त्ररूपेण प्रसिद्धानि। एतेषु वेदाङ्गेषु ज्यौतिषं चक्षुरूपेण स्थानं प्राप्तं प्रत्यक्षशास्त्रत्वात् । यथा –

**शब्दशास्त्रं मुखं ज्यौतिषं चक्षुषि श्रोत्रमुक्तं निरुक्तं च कल्पः करौ ।**
**या तु शिक्षाऽस्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर्बुधैः ।।**

**वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यतया चाङ्गमध्येऽतेनोच्यते ।**
**संयुतोऽपितरैः कर्णनासादिभिश्चक्षुषाऽङ्गेन हीनो न किञ्चित्करः ।।**

सुविदितमेव तत्र भवतां समेषां प्रेक्षावताम् अत्र **स्वाध्यायप्रवचने एवेति नाको मैद्गल्यः तद्धि तपः तद्धिः तपः** इति श्रुतिप्रामाण्यादनादिकालादेव साम्प्रतिककालपर्यन्तमनवरतावच्छिन्नरूपेण पल्लवितं पुष्पितञ्च ज्योतिषशास्त्रं लोककल्याणकारकं व्यावहारिकं च जगति प्रथन्ते। सर्वेषां मानवानाम् उपकारकं लोकहितङ्करो विराजते।

**द्युतेरिसिन्नादेश्च जः** ( उणादि.1-112 ) द्योतते प्रकाशते तत् ज्योतिः अग्निः सूर्यादिकं नक्षत्रं वा ज्योतिरधिकृतो ग्रन्थो ज्योतिषम्। नक्षत्रग्रहतारकादिज्योतिपिण्डानां स्थितिगतिप्रभावादिवर्णनपरं शास्त्रमेव ज्योतिषपदेनाभिधीयते। ग्रहाणां कालावस्थागत्यादिना शुभाशुभफलकथनेन ज्योतिषशास्त्रं प्रत्यक्षमेवोपकरोति। यथोक्तम्-

**प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्को यत्र साक्षिणौ ।**

अथ च कालज्ञापकमिदं शास्त्रं मयूराणां शिखा, नागानां मणिरिव वेदाङ्गेषु मूर्ध्नि स्थितम् । इति सोमाकारभाष्ये प्रतिपादितम्। यथा-

**यथा शिखा मयूराणां नागानां मणयो यथा ।**
**तद्वद् वेदाङ्गशास्त्राणां ज्योतिषं मूर्द्धनिस्थितम् ।।**

ज्योतिषशास्त्रस्योत्पत्तिः पितामहेन जाता इति सर्वथा विश्वस्यते। अस्य जगतः पितामहः चतुर्भ्यो मुखेभ्यः चतुरः वेदान् अवोचत्। वेदाः यज्ञकर्मप्रवृत्ताः सन्ति । ते च यज्ञाः कालाश्रयेण भवन्ति। ज्योतिषशास्त्राद् कालबोधो भवति। तद्यथा -

**वेदा हि यज्ञार्थमभिप्रभृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः ।**

**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद सर्वम् ।।**

**ज्योतिषशास्त्रस्य स्कन्धाः -**

ज्योतिषशास्त्रमिदं सिद्धान्त-संहिता-होराभेदेन त्रिषु स्कन्धेषु विभक्तमिति त्रिस्कन्ध-ज्योतिषशब्देनापि ज्ञायते। यथोक्तम् -

**सिद्धान्त संहिता होरा रुपं स्कन्धत्रयात्मकम् ।**

**वेदस्य निर्मलं चक्षुः ज्योतिश्शास्त्रमकल्मषम् ।।**

**1.सिद्धान्तस्कन्धः –**

अस्य प्रत्यक्षशास्त्रस्य मूलं भवति। सिद्धान्तः गणितशब्देनाऽप्यभिधीयते। सिद्धान्तज्यौतिषं गणितोपरि समाधृतं वर्तते। सिद्धान्तस्कन्धः मूलतो ग्रहगणितगोलभेदेन प्रसिद्धोऽस्ति । सिद्धान्तस्कन्धे त्रुटिकालतः प्रलयान्तकालं यावत् गणना भवति। सिद्धान्तग्रन्थेषु कल्पादितः कल्पान्तं यावद् ग्रहगणितं भवति अर्थात् यत्र युगवर्षायनर्तुमासपक्षहोरात्र-याम-मुहूर्त्त-नाडी-विनाडी-प्राण-त्रुट्यादिनां तथा सौरचान्द्रादि मासानां गणितसाधनं भवति तत् सिद्धान्तम् । यथा–

**त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदः क्रमाच्-**
**चारश्च द्युसदां द्विधा च गणितं प्रश्नस्तथा सोत्तराः ।**
**भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते**
**सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः ।।**

**2. संहितास्कन्धः**

सम्पूर्णज्योतिषशास्त्रस्य विषयाणां वर्णनं यत्र मिलति स संहितास्कन्धः। यस्मिन् स्कन्धे ज्योतिषशास्त्रस्य सामूहिकं फलानां वर्णनं विद्यते तस्य ग्रन्थस्य संहिता ग्रन्थमिति संज्ञा। संहितायाः विषयाः लोककल्याणदृष्ट्या महत्त्वपूर्णाः वर्तन्ते। यथा – दिग्दाहः, भूकम्पः, परिवेषादयः। यथोक्तम्

**तत्कात्स्नर्योपनयस्य नाम मुनुभिः सङ्कीर्त्यते संहिता ।**

संहिता स्कन्धे वास्तु-मुहूर्त्तः-सामुद्रिकः (हस्त शास्त्रम्) अन्तर्गतः भवन्ति।

### 3. होरास्कन्धः

होरा शास्त्रं नाम् फलितभागः। होरास्कन्धः व्यावहारिकः अस्ति। जातकस्य शुभाशुभफलादेशः येन शास्त्रेण क्रियते तत् शास्त्रं होराशास्त्रम्। जातकः पूर्वजन्मनि यद्यऽपि शुभाशुभकर्म करोति तस्य फलम् अग्रिमजन्मनि भुनक्ति । जातकस्य जन्मकुण्डल्यां ग्रहाः पूर्वजन्मनि कृतकर्मानुसारं पतन्ति। तस्यैव फलादेशः होराशास्त्रेण क्रियते। यथोक्तं वराहमिहिराचार्येण बृहज्जातके –

**होरेत्यहोराविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात् ।**

**कर्मार्जितं पूर्वभवे सदादि यत् तस्य पक्तिं समभिव्यनक्ति ।।**

**होराशास्त्रविभागः -**

इदं होराशास्त्रं पञ्चधा विभक्तमस्ति – जातकं – ताजिकं – रमलं – प्रश्नः – स्वप्नश्चेति ।

**1.जातकशास्त्रम् -**

होराशास्त्रस्य प्रथमः भागः जातकम्। पञ्चविभागेषु जातकमधिकप्रसिद्धमस्ति। होराशास्त्रमेव जातकशब्देनापि ज्ञायते। यथोक्तं कल्याणवर्मणः –

**जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यते होरा ।**

**अथवा दैवविमर्शनपर्यायः खल्वयं शब्दः ।।**

जातकशास्त्रेण जातकस्य जन्मकालिकनक्षत्रग्रहराश्यादीनाम् आधारी कृत्य जन्मकालात् आरभ्य मृत्युकालपर्यन्तं शुभाशुभफलादेशः क्रियते। जातकसम्बद्धग्रन्थः बृहज्जातकम्, लघुजातकम्, जातकालङ्कारादयः भवन्ति।

**2.ताजिकशास्त्रम् –**

येन शास्त्रेण जातकस्य एकस्य वर्षस्य फलादेशः क्रियते तत् शास्त्रं ताजिकम्। यदा जातकस्य वर्षकुण्डल्यां वर्षप्रवेशः भवति तदा वर्षप्रवेशकालात् आरभ्य अग्रिमवर्षप्रवेशकालं यावत् शुभाशुभफलादेशः क्रियते। ताजिकग्रन्थेषु गोचरीग्रहमाश्रीत्य फलादोशोऽपि विद्यते। ताजिकग्रन्थाश्च ताजिकनीलकण्ठीप्रभृतयः।

**3.रमलशास्त्रम् –**

यत्र च प्रस्तारद्वारा शुभाशुभफलं कथ्यते तद् रमलशास्त्रम्। रमलग्रन्थाश्च रमलनवरत्नादयः।

**4.प्रश्नशास्त्रम् –**

होराशास्त्रस्य अपरं अङ्गं प्रश्नः । यत्र च प्रश्नलग्नमाश्रित्य फलादेशः क्रियते तत्प्रश्नशास्त्रम्। प्रश्नग्रन्थाश्च प्रश्नमार्गः - प्रश्नसारादयः।

**5.स्वप्नशास्त्रम् –**

स्वप्नविवेचनेन शुभाशुभफलनिरूपकं स्वप्नशास्त्रम्। तदग्रन्थाश्च स्वप्नाध्यायादयः ।

**ग्रन्थस्य ग्रन्थकारस्य च परिचयः –**

प्रस्तुतग्रन्थः सारावली कल्याणवर्मणः कृतिः। ग्रन्थोऽयं चतुःपञ्चादशध्यायेषु कल्याणवर्माविरचितं सारावलीकाभिधं ग्रन्थरत्नं स्वतन्त्र रूपेण वर्तते। अत्र हि राशि – कालपुरुष – ग्रह – वरिश – आधान – ग्रहजज्ञान – अरिष्टनाश – ग्रहयुतिफलभाग्यभावविचार – राजयोग – दशान्तर्दशा – वियोनिजन्म - प्रस्तारचक्रादिविषया निरूपिताः ।

कल्याणवर्मा हि स्वं व्याघ्रपदीश्वरं कथयति। कल्याणवर्मा वराहमिहिरं स्मरति भट्टोत्पलश्च सारावलीं स्मरतीति कल्याणवर्मणः तदुभयान्तरालवर्तिसमयः स्थितिकाल इति। एतेषां समयः 550 मितशकाब्दः अनुमितः प्रायः। कल्याणवर्मणः कथनेन ज्ञायते यत् वराहमिहिराचार्येण मुनिप्रणीतग्रन्थानां सारसङ्क्षेपः कृत आसीद् बृहज्जातके यदा कल्याणवर्मणा यवनेश्वरादिप्रणीतग्रन्थानां सारसङ्क्षेपो गृहीत इति। (1-2-4) ग्रन्थस्य प्रयोजनविषये आदौ कथितम् यथा –

**राशिदशवर्गभूपतियोगायुर्दायतो दशादीनाम् ।**
**विषयविभागं स्पष्टं कर्तुं न तु शक्यते यतस्तेन ।।**

अत एव तत्पूर्त्यै प्रणीत इति। प्रतिज्ञानुसारमेव ग्रन्थोऽयं प्रणीतोऽपि। वस्तुतो असौ स्वविषये अप्रतिमः। अनुश्रुतियानुसारेण कल्याणवर्मा सारावलीमपूर्णामेव त्यक्त्वा पञ्चत्वमाप तस्या अवशिष्टभागो भट्टोत्पलेन पूरित इति। यथोक्तं सुधाकरद्विवेदिना –

**वर्षशतानां मध्ये न केनचित् पूरिता युता चीनैः ।**
**भट्टोत्पलस्तुं पूर्णां चकार सारावलीं सकलाम् ।।**

किन्तु ग्रन्थावलोकनेन न तथा प्रतिभाति।

प्रस्तुतग्रन्थे विषयचयनं प्रस्तुतिसौष्ठवं स्पष्टता च वैशिष्ट्यानि। वस्तुतः अयं होरातृष्णार्तानां स्फुटतरार्थशिशिरजल एव ।

**विषयानुक्रमणिका**


| | | |
|---|---|---|
| उपोद्घातः | ज्योतिषशास्त्रपरिचयः | पृष्ठसंख्या |
| | ग्रन्थस्य ग्रन्थकारस्य च परिचयः | |
| प्रथमः पाठः | ग्रन्थावतारोऽध्यायः | |
| द्वितीयः पाठः | होराशब्दनिरूपणाध्यायः | |
| तृतीयः पाठः | होराराशिप्रभेदाध्यायः | |
| चतुर्थः पाठः | ग्रहयोनिप्रभेदाध्यायः | |
| पञ्चमः पाठः | मिश्रसंज्ञकाध्यायः | |
| षष्ठः पाठः | योगकारकाध्यायः | |

**प्रथम खण्डः**

**ग्रन्थावतारोऽध्यायः**

**संरचना**

1.1. प्रस्तावना

1.2. लक्षिताधिगमविशेषाः

1.3. मङ्गलाचरणम्

1.4. ग्रन्थस्यारम्भकारणम्

1.5. ग्रन्थकारस्य परिचयः

1.6.बोधप्रश्नाः

**1.1.प्रस्तावना –**

आदौ प्रस्तुतग्रन्थे ग्रन्थावतारनामकोऽध्यायः निरुप्यते । पञ्चदशाध्यायीविभूषितमिदं कल्याणवर्माविरचितं सारावलीकाभिधं ग्रन्थरत्नं स्वतन्त्रग्रन्थरूपेण वर्तते । तथापि बृहज्जातकस्य विशदिविवरणरूपैव । प्रायः सर्वे व्याख्यातारः सारावलीवचनानि प्रमाणत्वेनोद्धरन्ति इत्येतत् विशिष्योच्यते ।

कल्याणवर्मा समग्रमपि होराशस्त्रस्य मूलतत्त्वं सारावल्यां सूत्ररूपेण व्यवस्थापितम् ।

**1.2.लक्षिताधिगमविशेषः**

1.मङ्गलश्लोकस्य अवबोधनं जायते ।

2. ग्रन्तकर्तुः परिचयः भवति ।

3. ग्रन्थस्यवैशिष्ट्यं ज्ञायन्ते।

**1.3.मङ्गलाचरणम् –**

मङ्गलादीनि, मङ्गलमध्यानि, मङ्गलान्तानि कर्माणि प्रथन्ते इति वचनानुसारेण ग्रन्थस्याऽदौ मङ्गलाचरणं शिष्टाचाराय कल्पते । सङ्कल्पित कार्यस्य निर्विघ्नतया परिसमाप्त्यर्थं सर्वेऽपि ग्रन्थ कर्तारः आचार्यश्च आदौ स्वीयं इष्टदेवं गुरुं वा स्मरन्ति।

आदित्याः समेषां मनुष्याणां रक्षकाः कर्मद्रष्टारश्च सन्ति । अस्माकं सर्वाणि कर्माणि सूर्यप्रकाशेन एव जायन्ते । सूर्य एव सविता । सूर्योदयादेव अस्य विश्वस्य प्रवृत्तिचक्रं गतिशीलं भवति । अस्तेन च शैथिल्यं निवृत्तिं वा आश्रीयते सूर्येण दिनानि भवन्ति, ताराभिः पूरिताः स्वर्णमयरात्र्यः आयान्ति, ऋतूनामागमनं परिवर्तनञ्च भवति यथोक्तम् –

**यस्योदये जगदिदं प्रतिबोधमेति**

**मध्यस्थिते प्रसरति प्रकृतिक्रियासु ।**

**अस्तं गतेस्वपिति चोच्छवसितैकमार्तं**

**भावत्रये स जयति प्रकटप्रभावः ।।** (सा.व. प्र.अ. श्लो.सं. - 1)

**अत्रोच्यते -** वस्तुतः ब्रह्मवेलायां यदा रात्रौ अतीते उषसि समागते सति प्रयाति तदैव तयोराविर्भावो भवति अर्थात् प्रातः यदा सूर्यः पूर्वाकाशक्षितिजे समुदेति तदा तस्य किरणजालं भूमौ अन्तरिक्षे च सर्वासु दिक्षु प्रसरति तदारभ्य जगदिदं प्रबुद्धं भवति, दिवाकरस्य मध्यामाकाशगमनेन जनाः स्वस्व कर्मणि निरताः भवन्ति, यस्य सवितृ देवतायाः अस्तगमनेन केवलं श्वासमात्रेण लोकः तिष्ठति इति दृश्यते एव । यथा – मानवाः, पशवः, खगाः सरीसृपाः, कीटाः, पतङ्गादयश्च सर्वेऽपि जीवाः सूर्योदयात् स्वजीवने कामपि नवीनामेव संजीवनीं शक्तिं कर्मक्षमतां स्फूर्तिं च आसाद्य सद्यः सचेतनं बलमोजः क्रियाशक्तिं कर्मक्षमताम् आत्मनि विन्दन्तः सोत्साहं सर्वकर्मसु यथारूपेण प्रवर्तन्ते । अतः सर्वदा भावत्रये जाग्रतवस्थायां, श्वापावस्थायां कर्मकरणावसरे च सूर्यः प्रभावी भूत्वा विजयते ।

## 1.4.ग्रन्थस्यारम्भकारणम्

एतद्नन्तरं ग्रन्थकारः ग्रन्थस्यारम्भकारणं, वैशिष्ट्यं, महत्वञ्च ग्रन्थे सूत्ररूपेण प्रदत्ताः यथा ।

**विस्तरकृतानि मुनिभिः परिहृत्य पुरातनानि शास्त्राणि ।**

**होरातन्त्रं रचितं वराहमिहिरेण संक्षेपात् ।।**

**राशिदशवर्गभूपतियोगायुर्दायतो दशादीनाम् ।**

**विषयविभागं स्पष्टं कर्तुं न तु शक्यते यतस्तेन ।।**

**अत एव विस्तेरभ्यो यवननरेन्द्रादिरचितशास्त्रेभ्यः ।**

**सकलमसारं त्यक्त्वा तेभ्यः सारं समुद्ध्रियते ।।** (सा.व. प्र.अ. श्लो.सं. 2-3-4)

होरायास्तंत्रं होरातन्त्रम् । शास्त्रेऽस्मिन् गर्गपराशरवशिष्ठाद्यष्टादशमहर्षिभिः प्रणीताः बहवः प्राचीनग्रन्थाः प्रमाणभूताः विद्यन्ते । मुनिवचनानि सम्यग्विचार्य वराहमिहिरेण संक्षेपेण होरातन्त्रं रचितम् । तेन राशिदशवर्गराजयोगायुर्दायतो दशादीनां फलनिर्धारणे काठिन्यतां मन्यमानेन कल्याणवर्मणा सारावलीनामकः होरातन्त्रं ग्रन्थः सरलताय निरमायि ।

अस्मिन् ग्रन्थे यवननेरन्द्रादिभिः रचितः विस्तृत व्याख्यानं त्यक्त्वा तदन्तर्गतं सारः एव निरूपितः ।

## 1.5.ग्रन्थकारस्य परिचयः

बघेलखण्ड जनपदस्य अनुश्रुतियानुसारेण अत्रत्या क्षत्रियाणां मूल पुरुषाणां मुखं व्याघ्ररुपम् आसित्। तदर्थं बघेलवंशीयः कथ्यते । कल्याणादत्तवर्मा वघेलवंशीयः अत एव व्याघ्रपदीश्वरो कथ्यते । यथा –

**देवग्रामपुरपोषणबलाद्ब्रह्माण्डसत्पञ्जरे**
**कीर्तिर्हंसविलासिनीव सहसा यस्येह भात्यातता ।**
**श्रीमद्वयाघ्रपदीश्वरो रचयति स्पष्टां स सारावलीं**
**होराशास्त्रविनिर्मलीकृतमनाः कल्याणवर्मा कृति ।।**
**होरातृष्णार्तानां शिष्याणां स्फुटतरार्थशिशिरजला ।**
**कल्याणवर्मशैलान्नदीव सारावली प्रसृता ।।** ( सा.व. प्र.अ. 5 – 6 )

ब्रह्माण्डरूपेऽस्मिन्पञ्जरे अन्तरगतस्य देवग्रामनगरनिवासीन् श्रीमद् व्याघ्रभट्टेश्वरः होराशास्त्रेण सम्पादित सुज्ञानेन निर्मलान्तःकरणः सन् हंस पक्षिणः किर्तिः यथा ब्रह्माण्डे विलसति तथैव लोके किर्तिदायिनीं सरलां सारावलीं रचयति ।

केषां कृते एतादृशी स्पष्टं सारावलीं चेत् होराशास्त्रे प्रविविक्षूणां प्रवेशाय सम्यक्बोधाय जिसासूनां जिज्ञासाशान्तये च सुनिपुणं प्रयासः कृतः । यथा हि नागाधिराजोद्भतानां पुण्यसलिलानां नदीनां गङ्गादीनां धाराः पवित्रतमेऽस्मिन् भारते प्रवहति तथैव आचार्य कल्याणवर्मा समुद्भताः होराशास्त्ररूपिज्योतिषधाराः ज्ञानगंगा सारावलीनाम्ना प्रवहन्ति ।

## 1.6.आदर्शप्रश्नाः

1. सारावलीग्रन्थस्य मङ्गलाचरणं सप्रमाणं लिखत ।

2. ग्रन्थकर्तुः परिचयं दत्वा ग्रन्थस्य वैशिष्ट्यं च लिखत ?

3. ज्योतिषशास्त्रस्य परिचयः देयः ।

☙ ❧

## द्वितीयखण्डः
## होराशब्दनिरूपणाध्यायः

**संरचना**

2.1. प्रस्तावना

2.2. लक्षिताधिगमविशेषाः ।

2.3. होराशास्त्रस्य महत्त्वम् ।

2.4. होराशब्दस्य व्युत्पत्तिः ।

2.5. होराशब्दस्यार्थः ।

2.6. जातक - होराशास्त्रयोः सम्बन्धः ।

2.7. होराशास्त्रस्य प्रशंसाः ।

2.8. बोधप्रश्नाः

### 2.1. प्रस्तावना

अध्यायेऽस्मिन् होराशास्त्रस्य महत्त्वं, व्युत्पत्तिः, अर्थः प्रशंसादि विषयाः निरूपिताः। होरास्कन्धः व्यावहारिकः अस्ति। जातानां जातकानां जन्म तदधिकृत्य कृतो ग्रन्थ इत्येव ज्योतिषशास्त्रीया व्युत्पत्तिः सिद्ध्यति, प्रायशः सर्वेऽपि मूलभूत ज्योतिषग्रन्थादयः जातकनाम्ना स्वप्रसिद्धिं चकार । होरा इत्यस्य प्रयोगः प्रारम्भिकज्योतिषकालात् एव दृश्यते ।

### 2.2. लक्षिताधिगमविशेषाः

1. होराशब्दस्य ज्ञानम् जायते ।
2. होराशास्त्रस्य महत्त्वम् अवगम्यते।
3. कर्मविपाक ज्ञानम् (फलनिर्धारणे)
4. जातक-होराशास्त्रयोः सम्बन्धज्ञानम् ।

### 2.3. होराशास्त्रस्य महत्त्वम् –

जातकस्य शुभाशुभफलादेशः येन शास्त्रेण क्रियते तत् शास्त्रं होराशास्त्रम् ।

**विधात्रा लिखिता यासौ ललाटेऽक्षरमालिका ।**

**दैवज्ञस्तां पठेद्व्यक्तं होरानिर्मलचक्षुषा ।। ( सा.व. द्वि.अ. श्लो.सं.-1)**

कृतकर्मणः फलं ब्रह्मणा ललाटे लिखितं तच्च विषयं दैवज्ञः होराशास्त्ररूपज्ञानचक्षुषा दृष्ट्वा अनुभोक्तव्यं फलं प्रकटयति।

## 2.4. होराशब्दस्य व्युत्पत्तिः

होराशब्दस्योपयोगः शास्त्रेषु बहुविधः कृताः आचार्यैः अत्राऽपि होराशब्दस्य व्युत्पत्तिः अहोरात्रशब्दात् जाता। यथोक्तम् –

**आद्यन्तवर्णलोपाद्धोराशास्त्रं भवत्यहोरात्रम्।**

**तत्प्रतिबद्धश्चायं ग्रहभगणश्चिन्त्यते यस्मात्।।** ( सा.व. द्वि. अ. श्लो.सं. - 2 )

अर्थात् अहश्च रात्रिश्चाहोरात्रो होराशब्देनोच्यते। अहोरात्रशब्दस्य आद्यन्तवर्णद्वयलोपात् सम्भवति। अर्थात् पूर्वोवर्णोऽकारो परवर्णश्चत्रकारस्तयोलोपमदर्शनं (अ त्र) कृत्वा होरा शब्दोऽवशिष्यते। होराशास्त्रोक्तसमयज्ञानपुरस्सरं ग्रहाणां स्थितिंगतिश्च सम्पाद्य फलनिर्णयो भवति। अहोरात्रमधिकृत्येव अस्य शास्त्रस्य पूर्वान्त्याक्षरलोपाद्धोराशास्त्रमिति नामास्ति।

## 2.5. होरा शब्दस्थार्थः –

एतत् पूर्वज्ञन्मार्जितकर्मणः शुभाशुभपंक्तिं राशिग्रहनक्षत्रस्थितिवशात् निरुपयन् सुखदुःखेष्टानिष्टोन्नत्यवनतिभाग्योदयादीनां मानवजीवने घटितानां सम्भाव्यमानानाञ्च सर्वेषां पक्षाणां दिग्दर्शनं कारयति। यथोक्तं

**कर्मफललाभहेतुं चतुराः संवर्णयन्त्यन्ये।**

**होरेति शास्त्रसंज्ञा लग्नस्य तथार्धराशेश्च।।** ( सा.व. द्वि. अ. श्लो.सं. -3)

एवं होराशब्दस्योपयोगः ज्योतिषशास्त्रे बह्वर्थे कृतो दृश्यते। पूर्वजन्मनि कृताणां पूर्वकर्मणां फलं खलु अस्मिन् जन्मनि कदा प्राप्यते इति ज्ञानं चतुराः दैवज्ञाः होराशास्त्र सहाय्येन कुर्वन्ति। तथा च केचन् होरेति शास्त्रसंज्ञा ( होरेति लग्नम् ) तथा राश्यर्द्धं होरा (भवनस्य चार्द्धम् ) शब्दः स्वीक्रियते।

## 2.6. जातक - होराशास्त्रयोः सम्बन्धः।

होराशास्त्रस्य प्रथमः भागः जातकम्। होराशास्त्रमेव जातकशब्देनापि ज्ञायते। एवं जातकशब्दः वर्तमानकालेऽपि स्वप्रसिद्धिं चकार परन्त्वत्र होराजातकयोः द्वयोः शब्दयोः ग्रहणं फलादेशार्थं क्रियते। यथा –

**जातकमिति प्रसिद्धिं यल्लोके तदिह कीर्त्यते होरा।**

**अथवा दैवविमर्शनपर्यायः खल्वयं शब्दः।।** ( सा.व. द्वि. अ. श्लो.सं. - 4 )

जातकशास्त्रमिति लोके प्रसिद्धं वर्तते तदेव होराशास्त्रम् । अथवा दैवज्ञ फलाफलविमर्शन शब्दः ।

## 2.7. होराशास्त्रस्य प्रशंसाः –

आर्थिकयुगेऽस्मिन् कथं होराशास्त्रं कुत्र कुत्र कथं सहायं करोति इति यथा –

**अर्थार्जने सहायः पुरुषाणामापदर्णवे पोतः ।**

**यात्रासमये मन्त्री जातकमपहाय नास्त्यपरः ।।** (सा.व. द्वि. अ. श्लो.सं. – 5 )

इदं शास्त्रं अर्थाजने सहायः, समुद्रे पोतमिव, यात्रासमये मन्त्री इव जनानां सहायं करोति ।

## 2.8. बोधप्रश्नाः

1. आधुनिकसमाजे ग्रन्थप्रयोजनं यथामति विवेच्यताम् ।

2. होराशास्त्रस्य महत्त्वं प्रतिपादयत ।

3. सारावली ग्रन्थस्य वैशिष्ट्यं लिखत ।

4. ज्योतिषस्य स्कन्धाः कति ।

5. होराशास्त्रस्य स्कन्धाः कति निरूपयत ।

6. होराशब्दस्य व्युत्पत्तिः विलिखत ।

**तृतीयखण्डः**

**होराराशिप्रभेदाध्यायः**

**संरचना**

3.1. प्रस्तावना
3.2. लक्षिताधिगमविशेषाः
3.3. राशिस्वरूपनिरूपणम्
3.4. कालपुरुषस्य अङ्गविभागः
3.5. मेषादीराशिनां संज्ञाः पर्यायपदानि च
3.6. भगणविभागम्
3.7. राशिस्वामिनिरूपणम्
3.8. बोधप्रश्नाः
3.9. नवांशस्वामि
3.10. भवनाधिपस्य प्रयोजनम्
3.11. वर्गोतम नवांशः
3.12. द्वादशांशः
3.13. द्रेष्काणः
3.14. होरा
3.15. त्रिशांशः
3.16. सप्तमांशः
3.17. राशीनां वर्गभेदसंख्या
3.18. राशीनां क्रूरसौम्य-पुरुषस्त्री-चरादिसंज्ञाः
3.19. गण्डान्तज्ञानं लग्नगण्डान्तं च
3.20. राशीनां दिक्बलं – राशिबलं – कालबलञ्च
3.20.1 राशिबलम्
3.20.2. कालबलम्
3.21. दिनरात्रिसंज्ञा
3.22. पृष्टोदयीशीर्षोदयसंज्ञा
3.23. बोधप्रश्नाः
3.24. लग्नादिद्वादशभावानां स्वरूपम्
3.25. लग्नादिद्वादशभावानां पर्यायपदानि एवं भावेषु विचारणीय विषयाश्च

3.26. भावानां चतुरस्त्र-केन्द्रादिसंज्ञा
3.27. ग्रहाणां मूलत्रिकोणस्थानानि
3.28. ग्रहाणां उच्चादिविभागाः
3.29. राशीनां ह्रस्वादिसंज्ञा
3.30. राशीनां प्लवत्वज्ञानम्
3.31. बोधप्रश्नाः

## 3.1. प्रस्तावना

राशिज्ञानप्रकारस्य ज्योतिषशास्त्रे ग्रहस्वरूपज्ञानवत् सुतरामावश्यकत्वम् । यतोहि ग्रहाणां राश्यादिज्ञानप्रकारेणैव स्पष्टत्वं बलाबलत्वञ्च ज्ञायते । तेन बलाबलत्वेनैव शुभाशुभफलं कथयितुं शक्यते । अस्य ग्रन्थस्य तृतीयाऽध्याये मेषाद्रिराशीनां स्वरूपादिकं प्रकृतिः, विभागः, षडवर्गाः, बलाबलत्वं, चरादिसंज्ञाः, केन्द्रादिसंज्ञाः भावानां संज्ञाश्च वर्णिताः । राशीनां दृष्टिभेदस्य वर्णनं दृश्यते । एतत्सर्वं ज्ञात्वा एव होरा शास्त्रे प्रवेशः समुचितं भवति । यतोहि अध्यायेऽस्मिन् विद्यमानाः सर्वेऽपि अंशाः होराशास्त्रस्य मूलभूताः सिद्धान्ताः वर्तन्ते । अतः अवबोधार्थं क्रमशः सर्वेऽपि विषयाः अधः उपस्थाप्यन्ते । मेषादिराशिनांस्वरुपज्ञानेन फलकथने सौकर्यं भवाति ।

## 3.2. लक्षिताधिगमविशेषाः

मेषादिराशीनां नामानि ज्ञायन्ते ।
षडवर्गाः ज्ञातुं प्रभवन्ति ।
मेषादिराशिनां केन्द्रादिसंज्ञा, उच्चनीचस्थानानि च ज्ञातुं प्रभवन्ति ।
भावानां नामानि पर्यायवाची च ज्ञायन्ते ।

## 3.3. राशिस्वरूपनिरूपणम्

कालपुरुषस्यान्तः स्थानरूपा आत्मादिस्थाने ग्रहास्तथास्य शरीरस्य बहिरङ्गानां स्थाने मेषादयो द्वादशराशयः प्रोक्ताः । अश्नुते व्याप्नोति क्षितिजं ग्रहांश्चेति राशिरुच्यते । ते च मेषवृषमिथुनकर्कसिंहकन्यातुला वृश्चिकधनुर्मकरकुम्भमीनाख्याः सन्ति ।

तेषां यथाक्रमं स्वरूपम् अत्र वर्णयते । अस्य ययि महानुपयोगः फलकथने तत्र भवताचार्येण प्रदर्शितः । यथोक्तं –

**मेषवृषमिथुनकर्कटसिंहाः कन्या तुलाथ वृश्चिककः**

**धन्वी मकरः कुम्भो मीनस्त्विति राशिनामानि ॥** (सा. व. तृ. अ. 3/3-4)

सम्यक् अवबोधार्थं चित्रं प्रदर्शयते –




उपरि चित्रं दृष्ट्वा ज्ञातुं शक्यते  अतः शास्त्रोक्तनियमं अनुसरामः तद्यथा –

सर्वादौ कुम्भः – स्कन्धस्योपरिधारितकलसः कश्चित् पुरुषविशेषः

मिथुनः – गदाधारी कश्चित् पुरुषः, वीणाधारी काचित् स्त्री उभयोः मैथुनवत् स्वरूपम् ।

मीनः – मीनौ नाम अन्योन्यं मुखपुच्छ सम्मिलितौ मीनयुगलौ ।

धनुः – अश्वजघने धनुर्धारी कश्चित् पुरुषविशेषः ।

मकरः – मकरः मृगास्यः (मृगमुखः) । अर्थात् शरीरं मकरस्य, मुखं मृगस्य ।

कन्या – प्रदीपसहिता च नौका संस्थिता प्लवगा कन्या ।


शेषराशयः (मेष, वृष, कर्कट, सिंह, वृश्चिक) स्वनाम सदृशाः आकृतयः दृग्गोचरीयाः भवन्ति ।

## 3.4. कालपुरुषस्य अङ्गविभागः

कालपुरुषस्याङ्गविभागः शरीरे स्थापनप्रकारः क्रमशः एवं कृतः

| | |
|---|---|
| मेषराशिः | शिरः |
| वृषभराशिः | मुखम् |
| मिथुनराशिः | बाहुः |
| कर्कटराशिः | हृदयम् |
| सिंहराशिः | उदरम् |
| कन्याराशिः | कटि |
| तुलाराशिः | वस्तिप्रदेशः<br>नाभिलिङ्गयोमध्यभागः |
| वृश्चिकराशिः | गृह्यः, लिंग स्थानम् |
| धनुराशिः | ऊरुः |
| मकरराशिः | जानुयुगलम् |
| कुम्भराशिः | जङ्घः |
| मीनराशिः | चरणयुगलम् |

विषयास्यास्य सम्यक् अवबोधनार्थं चित्रम् उपस्थाप्यते येन कालनरस्य विभिन्नेषु अङ्गेषु राशि ज्ञान प्रकारः मानसस्तरे दृढीभूतः स्यात् इति ।




अस्य प्रमुख प्रयोजनं जन्मकाले राशिः यदि पापाक्रान्तः भवति तदानीं तत्सम्बन्धित राशेः अङ्गेषु पीडा, शुभगृह संसर्गे अङ्गाः पुष्टाः भवन्ति इति अवबोधव्यम् ।

### 3.5. लोकव्यवहारार्थं मेषादीराशिनां संज्ञाः (पर्यायपदानि)

अस्य सम्क् ज्ञानार्थं कोष्ठं लिख्यते यथा-

| | | |
|---|---|---|
| मेषः | - | क्रियः, तुम्बुरः, अजः, विश्वः। |
| वृषः | - | ताबुरुः, उक्षः, गौः। |
| मिथुनं | - | जुतुमं, द्वन्दं, नृयुग्मं, यमं, युगम्। |
| कर्काटकः | - | कुलीरः, कर्क्कट। |
| सिंहः | - | लेय, कण्ठीरवः, मृगेन्द्रः। |
| कन्या | - | पाथोनः, रमणी, तरुणी। |
| तुला | - | जूकः, तौली, वणिक्। |
| वृश्चिकः | - | कौर्पिः, अलिः, कीटः। |
| धनुः | - | तौक्षिकः, धन्वी, चापम्। |
| मकरः | - | आकोकेरः. मृगः, मृगास्यः, नक्रः। |
| कुम्भः | - | घटः, तोयधरः, हृद्रोगः। |
| मीनः | - | अन्त्यः, मत्स्यः, पृथुरोमः, झषः। |

एवं प्रकारेण विशेषतया भवननामानि काथितानि मुनुभिः यथा – ऋक्षं, राशिः, क्षेत्रं, भम् इति।

### 3.6. भगणविभागम् -

**द्वादशमण्डलभगणं तस्यार्धे सिंहतो रविर्नाथः।**

**कर्कटकात्प्रतिलोमं शशी तथान्येऽपि तत्स्थानात्॥**

**भानोरर्धे विहगैः शूरास्तेजस्विनश्च साहसिकाः।**

**शशिनो मृदवः सौम्याः सौभाग्ययुताः प्रजायन्ते॥** ( सा.व. 3/9-10)

द्वादशराशीनां भोगः भगणः कथ्यते। भगणार्थं नाम षड् राशिः भोगः। अतेव सिंह राशिः स्वामि सूर्यः। कर्क राशिः स्वामि चन्द्रः। सिंहतो षट् राशिः मकर पर्यन्तं सूर्यः अधिपति भवति। कर्कात् विलोमं कुम्भ पर्यन्तं चन्द्रः अधिपति भवति। उदाहरणार्थं कुण्डली चक्रं प्रदर्श्यते –

| | | | | |
|---|---|---|---|---|
| मीन<br>गुरु | मेषः<br>कुजः | वृषः<br>शुक्रः | मिथुनः<br>बुधः | |
| कुम्भः<br>शनिः | | | कर्कः<br>चन्द्र | **चन्द्रः** |
| मकरः<br>शनिः | | | सिंहः<br>सूर्यः | **सूर्यः** |
| धनुः<br>गुरुः | वृश्चिकः<br>कुजः | तुला<br>शुक्रः | कन्या<br>बुधः | |

**अत्रोच्यते तत्प्रयोजनम् –**

जन्मकाले भानोः अर्धे सिंहादि क्रमेण ग्रहः स्यात् तदानिं जातकः शूरवीरः, तेजस्वीनः, साहसिकाः। एवमेव चन्द्र भागे अर्थात् विलोमेन कर्कादि क्रमेण ग्रहाः भवति चेत् मृदवः, सौम्याः, सौभाग्ययुताः भवन्ति ।

### 3.7. रशिस्वामिनिरूपणम् –

**कुजभृगुबुधेन्दुरविशशिसुतसितरुधिरार्यमन्दशनिजीवाः गृहपा ।**

यस्य ग्रहस्य यः राशिः भवति, तस्य ग्रहस्य तत् क्षेत्रं ( गृहं ) भवति। अस्य अवबोधार्थं सुलभ सूत्रम् एवं विद्यते तद्यथा - कुज शुक्र ज्ञ इन्दु अर्क ज्ञ । शुक्र कुज जीव मन्द मन्द जीव मेषादीनां राशीनां पतयः स्वामिनो भवन्ति। क्षेत्रं दृष्टवा स्पष्टं भवति । तद्यथा-

**राश्याधिपतिचक्रम्**

| | | | |
|---|---|---|---|
| **गुरुः** | **कुजः** | **शुक्रः** | **बुधः** |
| **शनिः** | | | **चन्द्रः** |
| **शनिः** | | | **सूर्यः** |
| **गुरुः** | **कुजः** | **शुक्रः** | **बुधः** |

मेषवृश्चिकयोः राशीशो भौमः, अतः भौमस्य गृहं मेषवृश्चिकराशी । वृषतुलयोः राशीशो शुक्रः अतः शक्रस्य  वृषतुले । मिथुनकन्ययोः राशीशो बुधः, अतः बुधस्य गृहं मिथुन कन्ये । कर्क राशीशः चन्द्रः अतः चन्द्रस्य कर्कराशिः । सिंह राशीशः सूर्य अतः सूर्यस्य

गृहं सिंहराशिः । धनुमीनयोः राशीशो गुरुः, अतः गुरो गृहं धनुमीनौ। मकरकुम्भयोः राशीशो शनिः अतः मकर कुम्भराशी स्तः ।

होराशास्त्रोक्त समस्तं शुभाशुभफलम् अधिपतिज्ञानं विना पदमपि गन्तुं न शक्यते। अतः होराशास्त्रे इदं प्रवेशद्वारमेव ।

### 3.8. बोधप्रश्नाः

1.कालपुरुषस्य अङ्गविभागं विशदयत

2. कालपुरुषस्य आत्मादिकारकत्वं विशदयत्

3. मेषादिराशीनां संज्ञा पर्यायपदानि च लिखत ।

4. भगणविभागं कुरुत ।

5. राशिस्वरूपं विलिखत ।

6. राशिस्वामि लिखत ।

### 3.9. नवांशस्वामि -

नवांशाधिपतिविभागः आचार्योक्त क्रमेण उपस्थाप्यते। राशेः नवमः भागः नवांशः कथ्यते । अस्यविचारक्रमः यथा मेष, मकर, तुला, कर्कादि क्रमेण । सुलभार्थं क्षेत्रं प्रर्दश्यते ।

| | | | |
|---|---|---|---|
| कर्कः | मेषः | मकरः | तुला |
| तुला | नवांशगणना | | कर्कः |
| मकरः | सूत्रसारणी | | मेषः |
| मेषः | कर्कः | तुला | मकरः |

**अत्रोच्यते -** उपरि चित्रं दृष्टवा सूत्रानुसारं स्वयं शीघ्रमेव अवबोधः जायते अर्थात् मेष-मकर-तुला- कर्क इति सूत्रम् । मेषराशी मेषराशितः एव नवांशगणना प्रवर्तते, वृषभराशौ मकरराशितः गणना भवति । मिथुनराशौ तुलाराशितः गणना भवति । कर्कराशौ कर्कराशितः गणना भवति । मीन सिंहराशौ मेषराशितः, कन्याराशौ मकरतः , तुलाराशौ तुलातः, वृश्चिकराशौ कर्कटः इत्येव प्रकारेण अग्रेऽपि क्षेत्रं दृष्ट्वा ज्ञेयम् ।

### 3.10. वर्गोत्तम नवांशः

सर्वत्र राशिषु स्वीयः नवांशः वर्गोत्तमः भवाति। वर्गोत्तम नवांशस्य विचारः चरस्थिरद्विस्वभाव राश्यानुसारं भवति । तत्र चर राशौ (मेष, कर्क, तुला, मकर) प्रथमनवांशः वर्गोत्तम संज्ञकः । स्थिरराशौ (वृष, सिंह, वृश्चिक, कुम्भ) मध्यनवांशः वर्गोत्तम संज्ञकः । द्विस्वभावे (मिथुन, कन्या, धनु, मीन) राशौ अन्तिमनवांशः वर्गोतम संज्ञकः ।

### 3.11. द्वादशांशः -

राशेः द्वादशतमो भागो द्वादशांशो भवति । यथा – 30 ° ÷12 = 2°/30 । 0° तः 2°/30 अंशादिं यावत् प्रथमो द्वादशांशः, ततः 5° /00 अंशं यावत् द्वितीयो द्वादशांशः, ततः 7°/30 / अंशादिं यावत् तृतीयो द्वादशांशः। एवमेव क्रमशः योगं कृते सति द्वादशांस्य द्वादशखण्डाः भवन्ति । द्वादशांशस्य गणना तस्मादेव राशेः भवति । स्पष्टार्थं द्वादशांशचक्रं प्रस्तूयते। तद्यथा –

**द्वादशांशचक्रम्**

| राशयः | मे. | वृ | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कु. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 2/30 | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 | 10 | 11 | 12 |
| 5/00 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 | 10 | 11 | 12 | 1 |
| 7/30 | 3 | 4 | 5 | 6 | 7 | 8 | 9 | 10 | 11 | 12 | 1 | 2 |
| 10/0 | 4 | 5 | 6 | 7 | 8 | 9 | 10 | 11 | 12 | 1 | 2 | 3 |
| 12/30 | 5 | 6 | 7 | 8 | 9 | 10 | 11 | 12 | 1 | 2 | 3 | 4 |
| 15/00 | 6 | 7 | 8 | 9 | 10 | 11 | 12 | 1 | 2 | 3 | 4 | 5 |

| | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 17/30 | 7 | 8 | 9 | 10 | 11 | 12 | 1 | 2 | 3 | 4 | 5 | 6 |
| 20/00 | 8 | 9 | 10 | 11 | 12 | 1 | 2 | 3 | 4 | 5 | 6 | 7 |
| 22/30 | 9 | 10 | 11 | 12 | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 |
| 25/00 | 10 | 11 | 12 | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 |
| 27/30 | 11 | 12 | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 | 10 |
| 30/00 | 12 | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 | 10 | 11 |

### 3.12. द्रेष्काणः –

राशित्रिभागः द्रेष्काणः उच्यते। एकस्मिन् राशौ द्रेष्काणत्रयं भवति । द्वादराशिषु षट्त्रिंशद् द्रेष्काणाः भवन्ति । प्रथमो द्रेष्काणः $0^0$ तः $10^0$ यावत् आत्मीय-भवनाधिपतेः भवति । द्वितीयद्रेष्काणः । $11^0$ तः $20^0$ यावत् पञ्चमस्थानाधिपतेः भवति । तृतीयद्रेष्काणः $21^0$ तः $30^0$ यावत् नवमस्थानाधिपतेः भवति । एवं द्रेष्काणमित्युक्ते $10^0$ अंशाः इति स्पष्टम् । स्पष्टार्थं द्रेष्काणचक्रं प्रस्तूयते । तद्यथा –

**द्रेष्काणचक्रम्**

| राशयः | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कु. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| $0^0$ - $10^0$ | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 | 10 | 11 | 12 |
| $11^0$-$20^0$ | 5 | 6 | 7 | 8 | 9 | 10 | 11 | 12 | 1 | 2 | 3 | 4 |
| $21^0$-30 | 9 | 10 | 11 | 12 | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 |

### 3.13. होरा –

होराशब्देना अत्र राशेः अर्द्धम् उच्यते । एकस्मिन् राशौ त्रिंशत् अंशाः भवन्ति। अतेव एकस्मिन् राशौ होराद्वयं भवति । द्वादशराशिषु चतुर्विंशतिः होराः भवन्ति। चतुर्विंशतिहोरासु मेषादिराशीनामावृत्तिद्वयं विद्यते । विषमराशौ सूर्यस्य $0^0$ तः $15^0$ अंशं यावत् प्रथमा होरा, चन्द्रस्य $16^0$ तः $30^0$ अंशं यावत् द्वितीया होरा । समराशौ चन्द्रस्य $0^0$ तः $15^0$ अंशं यावत् प्रथमा होरा, सूर्यस्य $16^0$ तः $30^0$ अंशं यावत् द्वितीया होरा भवति । स्पष्टार्थं होराचक्रमुपस्थाप्यते ।

**होराचक्रम्**

| राशयः | मे. | वृ | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कु. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| $0^0$-$15^0$ | सू. | चं. | सू. | चं. | सू. | चं. | सू. | चं. | सू. | चं. | सू. | चं. |
| $16^0$-$30^0$ | चं. | सू. | चं. | सू. | चं. | सू. | चं. | सू. | चं. | सू. | चं. | सू. |

## 3.14. त्रिशांशः

राशेः त्रिंशत्तमो भागः त्रिशांशः भवति । त्रिंशांशस्य काचित् भिन्नरीति शास्त्रकारैः प्रतिपादितम् । प्रत्येकराशेः पञ्चत्रिंशांशाः भवन्ति । अर्थात् त्रिंशदंशः पञ्चखण्डेषु विभक्तोऽस्ति। त्रिशांशविचारः विषम - सम क्रमेण भवति । विषम-समराशीनां पञ्च खण्डानां मानं भिन्नं – भिन्नं विद्यते । त्रिंशांशवर्गे सूर्यचन्द्रौ विहाय भौम-बुध-गुरु-शुक्र-शनयः त्रिंशांशस्य अधिपतयः भवन्ति । विषमराशिषु $0^0$ तः 5 अंश यावत् भौमः, 6तः $10^0$ अंशं यावत् शानिः, $11^0$ तः $18^0$ अंशं यावात् गुरुः $19^0$ तः $25^0$ अंशं यावत् बुधः $26^0$ तः $30^0$ यावत् च शुक्रः त्रिशांशाधिपतिः भवति । समराशिषु पूर्वोक्तस्य क्रमशः व्युत्क्रमेण त्रिशांशाधिपतयः भवति । यथा – समराशिषु $0^0$ तः $5^0$ अंशं यावत् शुक्रः, $0^0$ तः $12^0$ अंशं यावत् बुधः, $13^0$ तः $20^0$ अंशं यावत् गुरुः, $21^0$ तः $25^0$ यावत् शनिः, $26^0$ तः $30^0$ अंशं यावत् च भौमः त्रिशांशाधिपतयः भवन्ति । स्पष्टार्थं विषमसमराशित्रिंशांशचक्रं प्रस्तूयते । तद्यथा –

| विषमराशित्रिंशांशचक्रम् | | | | | | |
|---|---|---|---|---|---|---|
| राशयः | मे. | मि. | सिं. | तु. | ध. | कुं. |
| $05^0$ | मं. | मं. | मं. | मं. | मं. | मं. |
| $10^0$ | श. | श. | श. | श. | श. | श. |
| $18^0$ | गु. | गु. | गु. | गु. | गु. | गु. |
| $25^0$ | बु. | बु. | बु. | बु. | बु. | बु. |
| $30^0$ | शु. | शु. | शु. | शु. | शु. | शु. |

| समराशित्रिंशांशचक्रम् | | | | | | |
|---|---|---|---|---|---|---|
| राशयः | वृ. | क. | क. | वृ. | म. | मी. |
| $05^0$ | शु. | शु. | शु. | शु. | शु. | शु. |
| $10^0$ | बु. | बु. | बु. | बु. | बु. | बु. |
| $18^0$ | गु. | गु. | गु. | गु. | गु. | गु. |
| $25^0$ | श. | श. | श. | श. | श. | श. |
| $30^0$ | मं. | मं. | मं. | मं. | मं. | मं. |

### 3.15. सप्तमांशः -

राशेः सप्तमो भागः सप्तमांशः उच्यते। $0^0$ तः $4^0/17$ अंशादिं यावत् प्रथमसप्तमांशो भवति $4^0/17$ तः $8^0/34$ अंशादिं यावत् द्वितीयमप्तमांशो भवति। $8^0/34$ तः $12^0/51$ अंशादिं यावत् तृतीयसप्तमांशो भवति। $12^0/51$ तः$17^0/09$ अंशादिं यावत् चतुर्थसप्तमांशो भवति। $17^0/9$ तः $21^0/17$ अंशादिं यावत् पञ्चमसप्तमांशो भवति । $21^0/17$ तः $25^0/43$ अंशादिं यावत् षष्ठसप्तमांशो भवति । $25^0/43$ तः $30^0$ अंशं यावत् सप्तमसप्तमांशो भवति। ओजराशौ गणना क्रमेण तस्मात् राशेः भवति । समराशिषु तस्मात् राशेः सप्तमराशितः गणना क्रियते । स्पष्टार्थं सप्तमांशचक्रमुपस्थाप्यते ।

**सप्तमांशचक्रम्**

| राशयः | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कु. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| $4^0/17$ | 1 | 8 | 3 | 10 | 5 | 12 | 7 | 2 | 9 | 4 | 11 | 6 |
| $8^0/34$ | 2 | 9 | 4 | 11 | 6 | 1 | 8 | 3 | 10 | 5 | 12 | 7 |
| $12^0/51$ | 3 | 10 | 5 | 12 | 7 | 2 | 9 | 4 | 11 | 6 | 1 | 8 |
| $17^0/9$ | 4 | 11 | 6 | 1 | 8 | 3 | 10 | 5 | 12 | 7 | 2 | 9 |
| $21^0/26$ | 5 | 12 | 7 | 2 | 9 | 4 | 11 | 6 | 1 | 8 | 3 | 10 |
| $25^0/43$ | 6 | 1 | 8 | 3 | 10 | 5 | 12 | 7 | 2 | 9 | 4 | 11 |
| $30^0/00$ | 7 | 2 | 9 | 4 | 11 | 6 | 1 | 8 | 3 | 10 | 5 | 12 |

### 3.16. राशीनां वर्गभेदसंख्याः –

**षष्टिर्होरात्रिंशच्चूडपदानां द्विसप्ततिसमेता ।**

**लिप्तानामष्टादशशतानि परिवर्तनैः स्वगृहात् ।।**

अत्रोच्यते - एकस्मिन् होरायां राशौ वा त्रिंशदंशाः भवन्ति, अतेव एकस्मिनंशे षष्टिः कलाः विद्यन्ते । तत्रैव एकराशौ अष्टादशशतानि लिप्तानि भवन्ति एतेषां लिप्तानां परिवर्तनैः स्वगृहाद् एकस्मिन् राशौ (षड्वर्गे गृहीते सति ) षड् भेदा उपजायन्ते । अतएव चूडपदानां द्वादशराशीनां द्विसप्तति समेताः भेदाः लभ्यन्ते। तत्र सप्तवर्ग योजनेन द्वादश राशिषु $12 \times 7 = 84$ वर्गभेदाः भवन्ति । स्पष्टार्थं लिख्यते यथा-

1 राशिः = $30^0$ अंशः

$1^0$ अंशः = $60^0$ कलाः

30$^{0}$ अंशः = 1800$^{।}$ कलाः

12 x 6 = 72 षड्वर्गभेदाः

अत्र सप्तवर्ग योजनेन द्वादश राशिषु 84 वर्गभेदाः भवन्ति।

12 x 7 = 84 वर्गभेदाः

### 3.17 राशीनां क्रूरसौम्यसंज्ञा – पुरुषस्त्रीसंज्ञा-चरादिसंज्ञाश्च

मेषादितः क्रमेण क्रूरसौम्य-पुरुषस्त्री-चरस्थिरद्विस्वभावसंज्ञकाः भवन्ति। स्पष्टार्थं चक्रमुपस्थाप्यते

**मेषादिराशीनां क्रूरसौम्यसंज्ञा – स्त्रीपुरुषसंज्ञा-चरादिसंज्ञाबोधकचक्रम्**

| राशयः | मे. | वृ. | मि. | क. | सिं. | क. | तु. | वृ. | ध. | म. | कुं. | मी. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| क्रूर सौम्य | क्रूर | सौम्य | क्रूर | सौम्य | क्रूर | सौम्य | क्रूर | सौम्य | क्रूर | सौम्य | क्रूर | सौम्य |
| पुरु. स्त्री. | पुरु. | स्त्री | पुरु | स्त्री | पुरु. | स्त्री | पुरु. | स्त्री | पुरु. | स्त्री | पुरु. | स्त्री |
| चरस्थिद्वि | चर | स्थि. | द्वि. | चर | स्थि. | द्वि. | चर | स्थि | द्वि. | चर | स्थि. | द्वि. |

### 3.18. गण्डान्तज्ञानम् – लग्नगण्डान्तज्ञानम् -

कर्क-वृश्चिक-मीनयोः अन्तिमा घटी सन्धिरूपा लग्नगण्डान्तः उच्यन्ते । गण्डान्ते जातो नरो न जीवति शीघ्रं मरणं प्राप्नोति अथवा माता पितरौ स्वकुलहन्ता भवेत्। तथापि जातको यदि जीवितो भवति चेत् बहुगजतुरगो राजा इव भवति । यथोक्तम्-

**कुलीरमीनालिगृहान्तसन्धिं वदन्ति गण्डान्तमिति प्रसिद्धम् ।।**

**जातो न जीवति नरो मातुरपथ्यो भवेत्स्वकुलहन्ता ।**

**यदि जीवति गण्डान्ते बहुगजतुरगो भवेद्भूपः ।।** (सा. 3/20-21)

### 3. 19. 1. मेषादिराशीनां दिक्बलं- राशिबलं- कालबलञ्च

द्वादश राशयः भवन्ति, चत्वारः दिक् अतएव त्रिवारं त्रिवारं आवृत्तिः भवन्ति पूर्वादिक्रमेण राशीनां । यात्राकाले अस्य बहुः प्रयोजनम् भवति। यथा –

मेषः – सिंहः - धनुः = पूर्व दिक् प्रभुः ।


वृषः – कन्या – मकरः = दक्षिण दिक् प्रभुः ।

मिथुनः – तुलाः – कुम्भः = पश्चिम दिक् प्रभुः ।

कर्कः – वृश्चिकः – मीनः = उत्तर दिक् प्रभुः ।

स्पष्टार्थं चक्रम् उपस्थाप्यते-

**दिक्बलचक्रम्**




### 3.19. 2. राशिबलम् –

**नरसंज्ञकराशिः** - ( मिथुनः, कन्याः, तुला, कुम्भः, धनुपूर्वार्धभागः पूर्वदिक् बलिनः भवन्ति।

**पशुसंज्ञकराशिः** - ( मेषः, वृषः, सिंहः, धनुः उत्तरार्द्धं, मकर पूर्वार्द्धं दक्षिणदिक् बलिनः भवन्ति । **कीटसंज्ञकराशिः** - वृश्चिकः पश्चिमदिक् बलवान् भवति।

**कीटसंज्ञकराशिः** - कर्कः, मीनः, मकर उत्तरार्द्धंभागः उत्तर दिक् बलिनः भवन्ति।

### 3.19.3. कालबलम् –

**दिवाबलीः** = नरसंज्ञकराशिः।

**रात्रिबलीः** = पशुसंज्ञकराशिः।

**सन्ध्याबलीः** = कीटराशिः ।

### 3.20. दिनरात्रिसंज्ञा –

मेषः, वृषः, मिथुनः, कर्कः, धनुः, मकरश्च = रात्रौ बलिनो भवन्ति ।

सिंहः, कन्या, तुलाः, वृश्चिकः, कुम्भ- मीनश्च = दिवा बलिनो भवन्ति।

### 3.21. पृष्ठोदयशीर्षोदयसंज्ञा –

मेषः, वृषः, कर्कः, धनुः मकरश्च = पृष्टोदय संज्ञकाः ।

मिथुनः, सिंहः, कन्या, तुलाः, वृश्चिकः,कुम्भः = शीर्षोदय संज्ञकाः ।

मीनराशिः = उभयोदयसंज्ञकः ।

3.22. बोधप्रश्नाः –

1. नवांशस्वामि साधनं च लिखत।

2. द्रेष्काणसाधनं लिखत।

3. राशीनां वर्गभेदसंख्याः विशदयत।

4. मानवशरीरे राशीनां स्थानं निरुप्यताम्।

5. पृष्ठोदय, शीर्षोदय, उभयोदयराशयः, दिवाबलिरात्रिबलराशयः च के स्पष्ट्यत।

6. गण्डान्त विचारः कुरुत।

**3.23. लग्नादिद्वादशभावानां स्वरूपम् –**

लग्नस्य ज्योतिषशास्त्रे मूर्धन्यस्थानं विद्यते। लग्नं हि मूलाधारभूतमत्र फलितशास्त्रे। यतो हि विना लग्नं ग्रहस्थापनं – शुभाशुभफलज्ञानं नैव कर्तुं शक्यते। अतः लग्नमधिकृत्यैव जन्मकुण्डलीचक्रनिर्माणं द्वादशभावानां स्पष्टादिकं षोडशवर्गविवेचनमष्टकवर्गसाधनं प्रकाशकाप्रकाशग्रहस्पष्टादिकञ्च भवितुमर्हति। अतः विषयेऽस्मिन् लग्नस्य महत्त्वं किञ्चित् प्रस्तूयते-


**लग्नमूलाः क्रियास्सर्वा लग्नमूलं हि जातकम्।**
**लग्नं विना फलं व्यर्थं शिलायामुप्तबीजवत्।। ( दै.भ.ल.वि.श्लो.सं. - 46 )**

अतश्च जन्मसमयम् आधारीकृत्य जन्मलग्नं साध्यते। अत एव किं नाम लग्नम् जिज्ञासा जायते मनसि। जन्मकाले पूर्वक्षितिजे क्रान्तिवृत्तस्य राश्यादिः यस्मिन् प्रदेशे लग्नो भवति तद् एव प्रथमलग्नमिति आधारीकृत्य जन्माङ्गचक्रे राश्यंशसङ्केतेन लिख्यते। लग्नमेव प्रथमो भावः। तदनन्तरमवशिष्टा एकादशराशयो द्वादशभावाश्च भवन्ति। तेषु भावेष्वेव सकलः फलितज्यौतिषस्य विचारो विधीयते।

### 3.24. लग्नादिद्वादशभावानां पर्यायपदानि एवं भावेषु विचारणीय विषयाश्च

द्वादशभावेषु अङ्गविभागेन जातकस्य विभिन्नाङ्गानामाकारादीनां च ज्ञानं सम्भवति । जातकस्य जन्मकाले यद् लग्नं भवति तद् प्रभृति एव तस्य आकृति भवति इति । यः भावः प्रबलः भवति तद्भावोक्तानां अङ्गं जातकस्य प्रबलं ज्ञेयम् । तद्वदेव भावः दुर्बलश्चेत् तद्भावोक्तमङ्गं दुर्बलं भवेदिति सामान्यतया चिन्तयितुं शक्यते । ग्रहाणां स्थितिः युतिः दृष्टिः इत्यादिसम्बान्धेनैव भावस्य बलनिर्णयः क्रियते । अतः ग्रहाणां बलाबलमित्यादिकं सम्यक् निरीक्ष्य एव भावबलस्य निर्णयः कर्तव्यः । इत्येवं रीत्यात्र लग्नविभागक्रमः सप्रयोजनम् उपपाद्यते ।

भावबोधकचक्रम्




अत्र लग्नादिद्वादशभावानां पर्यायपदानि एवं भावेषु विचारणीयाः विषयाः एवं भवति । तद्यथा –

1. **प्रथमभावः** – लग्नम्, होरा, शक्तिः, देहः, उदयः, रुपम्, शीर्षम् वर्तमानम् , जन्म ।
2. **द्वितीयभावः** – धनं, वित्तम्, विद्या, सम्पत्, भुक्तिः, दक्षिणनेत्रं, लेखनम्, वाणी, कुटुम्बम्, स्व ।
3. **तृतीयभावः** – दुश्चिक्यम्, वक्षःस्थलम्, सेना, धैर्यम्, विक्रमं, भ्राता, पौरुषः ।
4. **चतुर्थभावः** - बन्धुः, गृहम्, क्षेत्रम्, मातुलः, मित्रम्, वाहनम्, माता, सुखं, जलं, पातालः, हिबुकम्,चतुरस्त्र ।
5. **पञ्चमभावः** – बुद्धिः, पुत्रः, सचिवः, आत्मा, सुतः ।
6. **षष्ठभावः** - अरिः, व्रणः, शत्रुः, ऋणम्, रोगः, षट्कोणः ।
7. **सप्तमभावः** – स्त्री, जामित्रम्, अस्तम्, कामः, धूनम्, भार्या, जाय।
8. **अष्टमभावः** – विनाशः, छिद्रः, रन्ध्रम्, मृत्युः ।

9. **नवमभावः** – पुण्यः, गुरुः, आचार्यः, पिता, पूजा, तपः ।

10. **दशमभावः** – आज्ञा, गगनः, कर्म, मानम्, जपः, कीर्तिः जीविका, मेषूरणम् ।


11. **एकादशभावः** - आयः, लाभः, भवः, आप्तिः, प्राप्तिः ।

12. **द्वादशभावः** – व्ययम्, रिष्फः, दुःखम्, क्षयः, अन्त्यः ।


**3.25. भावानां चतुरस्त्र - केन्द्रादिसंज्ञाः –**

1. चतुरस्त्रः = 4 / 8
2. तपस्थानम् = 9
3. चतुष्टयं, कण्टकं, केन्द्रस्थानानि = प्रथम-चतुर्थ-सप्तम-दशम (1,4,7,10) ।
4. फणफरस्थानानि = द्वितीय-पञ्चम-अष्टम-एकादशः (2,5,8,11)।
5. आपोक्लिमस्थानानि= तृतीय-षष्ठ-नवम-द्वादशः । (3,6,9,12)।
6. त्रिकोणस्थानानि = पञ्चम-नवमौ (5.9) ।
7. त्रित्रिकोणस्थानम् = नवम (9) ।
8. उपचयस्थानानि = तृतीय-षष्ठ-दशम- एकादशः ( 3-6-10-11 )
9. अनुपचयस्थानानि = शेषाः, 1, 2, 4, 5, 7, 8, 9, 12

केन्द्रादिसंज्ञाबोधकचक्रम्



**चतुरस्रादिबोधकचक्रम्**




एवं प्रकारेण सारावलीकारेण भावानां केन्द्रादि संज्ञाः क्रमेण उक्ताः। प्रथम-चतुर्थ-सप्तम-दशमभावानां केन्द्रमिति संज्ञाः । एवमेवान्यत्र ज्ञात्वा प्रयोगः कर्तव्यः। केन्द्रस्थानानां कण्टकं, केन्द्रं,चतुष्टमित्यपि पर्यायपदानि सन्ति । केन्द्रिस्थिता ग्रहाः बाल्यावस्थायां, पणफरस्थाग्रहाः युवावस्थायाम् एवं आपोक्लिमस्था ग्रहाः वृद्धावस्थायां क्रमेण फलदा भवन्ति इति । तद्य था –

**केन्द्रात्परं पणफरमापोक्लिमसंज्ञितं तयोः परतः**

**बालयुवस्थविरत्वे क्रमेण फलदा ग्रहास्तेषु ।।** ( सा. व. - 3 / 32 )

## 3.26.ग्रहाणां मूलत्रिकोणस्थानानि

सूर्यादिग्रहाणां क्रमशः सिंह - वृषभ - मेष  कन्या - धनु – तुला कुम्भाराशयः मूलत्रिकोणस्थानानि भवन्ति । **स्पष्टार्थं सारणी क्रियते ।**

**मूलत्रिकोणसूत्रसारिणी**

| ग्रहाः | मूलत्रिकोणराशयः | अंशाः |
|---|---|---|
| सूर्यः | सिंहः | $0^0$ - $20^0$ |
| चन्द्रः | वृषभः | $4^0$ - $30^0$ |
| भौमः | मेषः | $0^0$ - $12^0$ |
| बुधः | कन्या | $16^0$ - $20^0$ |

| | | |
|---|---|---|
| गुरुः | धनुः | $0^0$ - $10^0$ |
| शुक्रः | तुला | $0^0$ - $5^0$ |
| शनि | कुम्भः | $0^0$ - $20^0$ |

| | | | |
|---|---|---|---|
| | कुजः $0^0$ - $12^0$ | चन्द्रः $4^0$ - $30^0$ | |
| शनिः $0^0$ - $20^0$ | **मूलत्रिकोणसंज्ञाबोधक चक्रम्** | | |
| | | | रविः $0^0$ - $20^0$ |
| गुरुः $0^0$ - $10^0$ | | शुक्रः $0^0$ - $5^0$ | बुधः $16^0$-$20^0$ |

उपरि प्रतिपादिताः राशयः ग्रहाणां मूलत्रिकोणराशयः भवन्ति ।

## 3.27.ग्रहाणामुच्चादिविभागाः

एकस्मिन् राशौ त्रिंशदंशाः भवन्ति। तत्र त्रिंशदेशेषु विभागाः । अर्थात् शून्यांशात् कश्चित् निर्दिष्टमंशं तस्य उच्चं नीचं स्यात् ततः तस्य ग्रहस्य स्वगृहमपि स्यात्। अस्य स्पष्टविचारः उपस्थापनात् पूर्वं सूर्यादि नवग्रहाणां उच्चनीचस्थानं पश्यामः ।

सूर्यस्य उच्चस्थानं मेषः, चन्द्रस्य वृषः, मङ्गलस्य मकरः, बुधस्य कन्या, गुरोः कर्कः, शुक्रस्य मीनः, शनेः तुला। मेषादि क्रमेण – $10^0$, $3^0$, $28^0$, $15^0$, $5^0$, $27^0$, $20^0$, स्पष्टार्थं चक्रम् उपस्थाप्यते तद्यथा –

| ग्रहाः | उच्चस्थानानि | | नीचस्थानानि | परमनीचांशाः |
|---|---|---|---|---|
| | राशिः | परमोच्चांशाः | राशिः | अंशाः |
| सूर्यः | मेषः | $10^0$ | तुला | $10^0$ |
| चन्द्रः | वृषभः | $3^0$ | वृश्चिकः | $3^0$ |
| कुजः | मकरः | $28^0$ | कर्कः | $28^0$ |
| बुधः | कन्या | $15^0$ | मीनः | $15^0$ |
| गुरुः | कर्कः | $5^0$ | मकरः | $5^0$ |
| शुक्रः | मीनः | $27^0$ | कन्या | $27^0$ |
| शनिः | तुला | $20^0$ | मेषः | $20^0$ |

उपयुर्क्तसारण्यां रव्यादीनामुच्चनीचस्थानानि प्रदत्तानि वर्तन्ते । उच्चस्थानात् सप्तमराशिः नीचस्थानं भवति । उदा – अत्र रवेः उच्चस्थानं मेषराशिः, ततः सप्तमराशिः तुला तस्य नीचस्थानं भवति । एवमेव सर्वेषामपि ग्रहाणां ज्ञेयम् इति । उपरि उच्चस्थानेन सह परमोच्चपरमनीचस्थानान्यपि प्रदत्तानि । उदाहारणम् – चन्द्रस्य उच्चराशिः वृषभः तत्र च तृतीये अंशे चन्द्रः परमोच्चो भवतीति ज्ञेयम् । रविः मेषराशौ दशमे अंशे परमोच्चो भवति। एवमेव सर्वत्र ज्ञेयम् । परमोच्यस्थानवदेव परमनीचस्थानस्यापि ग्रहणं कार्यमिति ग्रन्थकारस्य मतम् । फलकथनावसरे अस्य बहुः प्रयोजनम् आवश्यकं च भवति यतोहि ग्रहणां बलनिर्णये, राजयोगदीनां निर्णये च अतीव महत्त्वं दृश्यते ।

### 3.28. राशीनां ह्रस्वादिसंज्ञा

| ह्रस्वसंज्ञकः | समसंज्ञकः | दीर्घ संज्ञकः |
|---|---|---|
| मीनः<br>वृषभः<br>मेषः<br>कुम्भः | मिथुनः, कर्कः<br>धनुः, मकरः | सिंहः, कन्या<br>तुला, वृश्चिकः |

### 3.29.राशीनां प्लवत्वज्ञानम् –

भवनाधिपदिक् नाम प्लव इति यवनैः कथितः। राशेः अधिपतित्त्वं कुर्वन्ति रव्यादि ग्रहाः। तद्यथा मेष वृश्चिकयोः भौमः अधिपतिः तस्य दक्षिण दिक् तत्र तौ प्लव संज्ञकौ। एवमेव प्रत्येक दिक् ल्पवत्व संज्ञकाः भवन्ति । विषयस्यास्य सुस्पष्टम् अवबोधनार्थं क्षेत्रं प्रदीयते । तद्यथा –

**प्लवत्वबोधकचक्रम्**

| राशयः | अधिपतिः | प्लवत्वदिक् |
|---|---|---|
| मेषः – वृश्चिकः | कुजः | दक्षिणदिक् |
| वृषः – तुला | शुक्रः | अग्निकोणः |
| मिथुनः – कन्य | बुधः | उत्तरदिक् |
| कर्कः - | चन्द्रः | वायव्यकोणः |
| सिंहः - | सूर्यः | पूर्वदिक् |
| धनु-मीन | गुरु | ईशानकोणः |
| मकरः – कुम्भः | शनि | पश्चिमदिक् |

### 3.30. द्वादशराशीनां वर्णाः

जातकानां जन्मकालिक लग्न राश्यानुसारेणव शरीराकृतिः वर्णाः, स्वरूपं च भवति। अतएव एतस्य विचारः नितरां अपेक्षते । यतोहि राश्यानुकुलः वर्णः दैनन्दिनं प्रभावयति मानवजीवनम्। तद्यथा –

| **राशयः** | | **वर्णाः** | **राशयः** | | **वर्णाः** |
|---|---|---|---|---|---|
| मेषः | - | अरुणवर्णः | वृषः | - | श्वेतवर्णः |
| मिथुनः | - | शुकवर्णः (हरितः) | कर्कः | - | रक्तवर्णः |
| सिंह | - | धूम्रवर्णः (पाण्डुः) | कन्या | - | चित्रवर्णः |
| तुला | - | कृष्णवर्णः | वृश्चिकः | - | सुवर्णवर्णः |
| धनुः | - | पीतवर्णः | मकरः | - | कर्बुरः |
| कुम्भः | - | नकुलवर्णः | मीनः | - | स्वच्छवर्णः |

### 3.30.बोधप्रश्नाः

1. लग्नादिद्वादशभावानां कारकत्वम् एवं संज्ञान्तराणि च लिखत ।

2. ग्रहाणाम् उच्चनीचपरमोच्चपरमनीचस्थानानि लिखत ।

3. ग्रहाणां बलविचारः कुरुत ।

4. राशीनां प्लवत्वं लिखत ।

5. राशीनां ह्रस्वादिसंज्ञा विशदयत ।

**चतुर्थः खण्डः**

**ग्रहयोनिप्रभेदाध्यायः**

**संरचना**

**4.1.** प्रस्तावना
4.2. लक्षिताधिगमविशेषाः
4.3. ग्रहाणां आत्मादिविभागाः
4.4. जन्मलग्न-द्रेष्काणवशेन अङ्गविभागः
4.5. ग्रहाणां राजादीसंज्ञा
4.6. दिगीश्वराः
4.7. ग्रहाणां शुभाशुभत्वम्
4.8. व्यवहारार्थं ग्रहाणां संज्ञा
4.9. ग्रहाणां वर्णाः
4.10. ग्रहाणाम् अधिदेवताः
4.11. ग्रहाणां प्रकृतिविभागः
4.12. ग्रहाणां जाति निरुपणम्
4.13. ग्रहाणां महाभूताधिपत्य विचारः
4.14. बोधप्रश्नाः
4.15. ग्रहाणां रस निरूपणम्
4.16. ग्रहाणां स्थानानि
4.17. ग्रहाणां वस्त्राणि - द्रव्याणि - कालाः – ऋतवश्च
4.18. ग्रहाणां वेदाधिपतिज्ञानम्
4.19. ग्रहाणां देवलोकाधिपतिज्ञानम्
4.20. ग्रहस्वरूप निरूपणम्
4.20.1. सूर्यस्वरूपम्
4.20.2. चन्द्रस्वरूपम्
4.20.3. कुजस्वरूपम्
4.20.4. बुधस्वरूपम्
4.20.5. गुरुस्वरूपम्
4.20.6. शुक्रस्वरूपम्
4.20.7. शनिस्वरूपम्
4.21. ग्रहाणां मैत्रीविचारः
4.21.1. नैसर्गिकं मित्रामैत्रीविचारः

4.21.2. तात्कालिक मैत्रीविचारः
4.21.3. पञ्चधा मैत्रीविचारः
4. 22. 1. ग्रहाणां सामान्य दृष्टिविचारः
4.22.2. ग्रहाणां विशेष दृष्टिविचारः
4. 23. ग्रहाणां बलनिरूपणम्
4.23.1. दिक्बलम्
4.23.2. स्थानबलम्
4.23.3. कालबलम्
4.23.4. चेष्टाबलम्
4.23.5. द्रेष्काणबलम्
4.23.6. त्र्यंशबलम्
4.23.7. निसर्गबलम्
4.24. बोधप्रश्नाः

## 4.1. प्रस्तावना

गृहणाति गतिविशेषानिति ग्रहाः आकाशे ज्योतिर्बिम्बानि अनन्तसंख्यकानि दृश्यन्ते। सर्वाणि तानि स्थिरस्थानानि नक्षत्राणीति कथ्यन्ते। ग्रहास्तु पूर्वाभिमुखं गच्छन्ति, तानि नक्षत्राणि सततं गृह्णन्ति अतएव एते ग्रहाः इति प्रोच्यन्ते। ग्रहाणां नवसंख्या। यत्र ग्रहाणां सप्त संख्या प्रोक्ता तत्र राहुकेतू विहाय ज्ञातव्या। होराशास्त्रे फलकथनार्थं ग्रहाणां वर्णलिङ्गादिज्ञानमावश्यकमतोऽत्र क्रमेण अवबोधार्थं निरुप्यते।



### 4.2. लक्षिताधिगमविशेषाः

- ❖ कालपुरुषस्य अङ्गविभागं ज्ञायन्ते।
- ❖ ग्रहाणाम् आत्मदिविभागं ज्ञातुं प्रभवन्ति।
- ❖ ग्रहाणां रस-स्थान-वस्त्रादिज्ञानम्।
- ❖ ग्रहाणां गुणस्वरुपादि ज्ञातुं प्रभवन्ति।

### 4.3. ग्रहाणाम् आत्मादिविभागाः

ग्रहविचारे आदौ आत्मादिविभागस्य ज्ञानं क्रियते। यतोहि यथा शरीरे आत्मा मुख्याङ्गं भूत्वा शरीरस्य सर्वाङ्गं, संचालयति तथैव ग्रहजगतेषु त्रैलोक्यदीपः रविः सर्वापेक्षया अधिक किरणत्वात् सौरजगतस्य आत्मरुपेण स्वीक्रियते। अतः कालरुपी पुरुषस्य आत्मा रविः। मनसः अधिपतित्वं करोति चन्द्रमा। वलस्याधिपतित्वं करोति भौमः। बुधस्तु वाण्याः वचनस्य। गुरुः सौख्यज्ञानस्य। शुक्रः कामशक्तेः। शनिः दुखम्। यथा-

**आत्मा रविः शीतकरस्तु चेतः सत्वं धराजः शशिजोऽथ वाणी ।**

**ज्ञानं सुखं शुक्रगुरुश्च मदश्च राहुः शनिः कालनरस्य दुःखम् ।।**

**आत्मादयो गगनगैर्बलिभिर्बलवत्तराः ।**

**दुर्बलैर्दुर्बलास्ते तु विपरीतं शनेः फलम् ।।**

| **ग्रहाः** | **कारकाः** |
|---|---|
| सूर्यः | आत्मकारकः |
| चन्द्रः | मनः |
| कुजः | सत्वम् |
| बुधः | वाणी, |
| गुरुः | ज्ञानसुखात्मकः |
| शुक्रः | मदनम्, कामः |
| शनिः | दुःखम् |

एतस्य प्रमुखप्रयोजनम् भवति जातकस्य जन्मकाले ये ग्रहाः बलिनः भवन्ति तदधिकृतः अङ्गविभागः हृष्टः, पुष्टश्च भवति। निर्बले च निर्बलं भवेदिति। शनेः विपरीतं फलं भवति। उदा- जन्मकाले सूर्यः बलवान् चेत् पुरुषस्य आत्मा पुष्टः भवति एवमेव चन्द्रः बलवान् चेत् मनः पुष्टः भवतित्यर्थः।

## 4.4. जन्मलग्न-द्रेष्काणवशेन अङ्गविभागाः

**यथायथा लग्नगृहाश्रयाणां समुद्गमो भूरिविकल्पनानाम्।**

**तथातथा शैलनवाष्टसंख्याः क्रमेण कालावयवाः प्रसूताः ।।** (सा.व. 4/ 3)

राशित्रिभागः द्रेष्काणः उच्यते। एकस्मिन् राशौ द्रेष्काणत्रयं भवति। तथैव जन्मकाले लग्नस्य द्रेष्काणत्रयस्य उदयं भवति तथैव तथातथा कालपुरुषस्य त्रि अवयवाः उत्पन्नाः भवन्ति। अतः जन्मनि लग्नगृहाश्रयाणां यथा यथा त्रिविकल्पानां समुद्गमो अभूत्, तथातथा क्रमेण शैल 7 – नग 7 – अष्टसंख्याः - 8 कालावयवयाः - उत्पन्नाः भवन्ति प्रसूतौ। यथोक्तम् –

**मूर्धालोचनकर्णगन्धवहनं गण्डौ हनुश्चाननं**

**ग्रीवास्कन्धभुजं तु पार्श्वहृदयक्रोडाश्च नाभिः पुनः।**

**वस्तिर्लिङ्गुदे च मुष्कयुगलं चोरुद्वयं जानुनी**


**जङ्घे पादयुगं विलग्नभवनात्पार्श्वद्वये कल्पिताः ।।**

**पापा व्रणं लाञ्छनमेषु सौम्याः स्वांशे स्वराशावथवा स्थितेषु ।**

**कुर्वन्ति जन्मोत्थितमेषु चिह्नमेषु ग्रहास्तद्विपरीतसंस्थाः ।।** (सा.व. 4 / 5-6)

इदानीं जातस्य शरीरे द्रेष्काणवशाद् भावानां त्रिधा-परिकल्पनम् क्रियन्ते । तत्र लग्ने प्रथमद्रेष्काणे विद्यामाने शिरःप्रभृत्यङ्गभेदो, द्वितीये द्रेष्काणे कण्ठाद्यः, तृतीये द्रेष्काणे वस्त्यादौ विभागः। तत्र उदित् राशिभिः (12,11,10,9,8,7) वाममङ्गमनुदितैर्लग्नादिषट्कैः (1,2,3,4,5,6) दक्षिणमङ्गं वाच्यम् ।

अत्र अङ्गेषु त्रिधा राशिकल्पनाम् उच्यते। तस्मिन् लग्नस्य प्रथमद्रेष्काणे शीर्षादौ द्वितीये कण्ठादौ, तृतीये वस्त्यादौ । पापग्रहयुते व्रणं भवति इति ज्ञेयम् । एवमेव तत्र शुभग्रहावलोकिते युते च तदङ्गे तिलमशकादि चिह्नम् भवति इति ज्ञातव्यम् । स च वर्णादिकारको ग्रहो निजराशौ नवांशे स्थिरराशौ स्थिरनवांशे च भवेत्तदा तद्व्रणादि सहजोत्पन्नम् इति अवगन्तव्यम् । अन्य राश्यादौ चरादौ च केनचित्कारणेनागन्तुको व्रणादिको भवति । आगन्तुकस्य व्रणादेः ग्रहवशान्निमित्तमुच्यते । स्पष्टार्थं नरचक्रं प्रस्तुयते-



1. लग्नस्य प्रथमद्रेष्काणे जन्मश्चेत् – शिरः, लोचनम्, कर्णः, नासिका, कपोलः, हनुः, मुखम्।

2. लग्ननस्य द्वितीयद्रेष्काणे जन्मश्चेत् – कण्ठः, स्कन्धः, भुजं, पार्श्वः, हृदयम्, उदरम्, नाभिः।

3, लग्नस्य तृतीयेद्रेष्काणे जन्मश्चेत् – वस्ति, गुप्ताङ्गं, उरुः, जानुयुगलम्, जङ्घे, पादयुगलम्।

**उदाहरणम् –**

लग्नस्य प्रथमद्रेष्काणे जन्मश्चेत्-


| **भावाः** | **अङ्गम्** |
|---|---|
| प्रथमभावः | शिरः |
| द्वितीयभावः | दक्षिणनेत्रम् |
| तृतीयभावः | दक्षिणकर्णः |
| चतुर्थभावः | दक्षिणनासिका |
| पञ्चमभावः | दक्षिणकपोलः |
| षष्ठभावः | दक्षिणहनुः |

| | |
|---|---|
| सप्तमभावः | दक्षिणमुखम् |
| अष्टमभावः | वामहनुः |
| नवमभावः | वामकपोलः |
| दशमभावः | वामनासिका |
| एकादशभावः | वामकर्णः |
| द्वादशभावः | वामनेत्रम् |

एवमेव द्वितीयद्रेष्काणे ग्रीवामारभ्य नाभिस्तावत्, तृतीयेद्रेष्काणे अधः वस्तिप्रदेशादिनां कल्पना करणीयम्। यस्मिन् भागे पापग्रहः भवति तत् भागः व्रणं स्यात्। यस्मिन् भागे शुभग्रहः भवति तत् भागः तिलादिकं चिह्नं भवेत्। एवमेव ग्रहाः स्वनवांशे, स्वराशौ चेत् एषु चिह्नं जन्मोत्थितं कुर्वन्ति तद्विपरीत संस्था ग्रहाः जातस्योत्तर काले केनचिन्निमित्तेन चिह्नं व्रणं वा कुर्युः।

### 4.5. ग्रहाणां राजादीसंज्ञा –


सूर्यादि ग्रहाणां मध्ये राजानौ-सूर्यचन्द्रौ, सेनापतिः – भौमः, राजकुमारः – बुधः, सचिवौ – गुरुशुक्रौ, भृत्यः – शनैश्चरः ।




### 4.6.दिगीश्वराः

सूर्यः, शुक्रः, कुजः, राहुः, शनिः, चन्द्रः, बुधः, गुरुश्च क्रमेण प्राच्यादि दिगधीश्वराः भवन्ति। तद्यथा –

**दिशास्वामी चक्रम्**




### 4.7.ग्रहाणां शुभाशुभत्वम् -

अत्र केचन गहाः शुभाख्याः केचन ग्रहाः अशुभाख्याः च सन्ति ।

शुभग्रहाः – शुक्लपक्षस्य चन्द्रमा, शुभग्रहयुतः बुधः, देव गुरुः बृहस्पतिः, दैत्यगुरुः शुक्रः ।

पापग्रहाः – क्षीणः चन्द्रः, पापग्रहयुक्तः बुधः, तथा रविकुजशनिराहुकेतुश्च।

| शुभग्रहाः | अशुभग्रहाः |
|---|---|
| पूर्ण चन्द्रः, बुधः, गुरुः, शुक्रः । | क्षीणः चन्द्रः, पापग्रहयुक्तः बुधः, रविः, कुजः, शनिः, राहुः, केतुः । |

### 4.8.व्यवहारार्थं ग्रहाणां संज्ञा –

| **ग्रहाः** | **पर्यायपदानि** |
|---|---|
| सूर्यः | हेलिः, भानुः, अरुणः, अर्कः, पूषा । |
| चन्द्रः | शशी, चन्द्रः, सोमः, उडुपतिः, इन्दुः । |
| कुजः | क्रूराक्षः, क्षितिनन्दनः, आरो, रक्तः, वक्रः । |
| बुधः | हेम्नः, विद्, ज्ञ, बोधनः । |
| गुरुः | ईड्यः, एज्यः, अङ्गिरा, जीवः । |
| शुक्रः | स्फुजित, सित, भृगुः । |
| शनिः | मन्दः, कोणः, यमः, कृष्णः । |

## 4.9. ग्रहाणां वर्णाः

| ग्रहाः | वर्णाः |
|---|---|
| सूर्यः | ताम्रवर्णः |
| चन्द्रः | दुग्ध इव श्वेतः |
| कुजः | रक्तः |
| बुधः | हरितः |
| गुरुः | पीतः |
| शुक्रः | विचित्रः |
| शनिः | कृष्णः |

## 4.10. ग्रहाणाम् अधिदेवताः

| ग्रहाः | अधिदेवताः |
|---|---|
| सूर्यः | अग्निदेवः |
| चन्द्रः | जलम् |
| कुजः | कार्तिकेयः |
| बुधः | केशवः |
| गुरुः | इन्द्रः |
| शुक्रः | इन्द्राणि |
| शनिः | ब्रह्मा |

## 4.11. ग्रहाणां प्रकृतिविभागः

| स्त्रीसंज्ञकः | नपुंसकसंज्ञकः | पुरुषसंज्ञकः |
|---|---|---|
| चन्द्रः | बुधः | गुरुः |
| शुक्रः | शनिः | सूर्यः, कुजः |

## 4.12. ग्रहाणां जाति निरुपणम्

| जातिः | ब्राह्मणः | क्षत्रियः | वैश्यः | शूद्रः | अन्त्यजः |
|---|---|---|---|---|---|
| ग्रहाः | गुरुः, शुक्रः | सूर्यः, कूजः | चन्द्रः | बुधः | शनिः |

## 4.13. ग्रहाणां महाभूताधिपत्य विचारः

| तत्त्वानि | अग्नितत्त्वम् | भूतत्त्वम् | आकाशतत्त्वम् | जलतत्त्वम् | वायुतत्त्वम् |
|---|---|---|---|---|---|
| ग्रहाः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |

## 4.14. बोधप्रश्नाः

1. ग्रहाणां वर्ण विचारं कुरुत ।

2. ग्रहाणां राजादीसंज्ञा लिखत ।

3. ग्रहाणां प्रकृतिविभागः कुरुत ।

4. ग्रहाणां जाति निरूपणं कुरुत ।

5. ग्रहाणां शुभाशुभत्वं लिखत ।

## 4.15. ग्रहाणां रस निरुपणम्

| **रसाः** | कटुः | लवणम् | तिक्तः | मिश्रितः | मधुरम् | आम्लः | कषायः |
|---|---|---|---|---|---|---|---|
| **ग्रहाः** | सूर्यः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |

## 4.16. ग्रहाणां स्थानानि

| ग्रहाः | स्थानानि |
|---|---|
| सूर्यः | देवभूमिः (देवस्थानम्) |
| चन्द्रः | जलस्थानम् |
| कुजः | अग्निस्थानम् |
| बुधः | क्रीडास्थानम् |
| गुरुः | कोशस्थानम् (भण्डारगृहम्) |
| शुक्रः | शयनस्थानम् |
| शनिः | उसरभूमिः |

## 4.17. ग्रहाणां वस्त्राणि – द्रव्याणि - कालाः – ऋतुश्च

| ग्रहाः | वस्त्राणि | द्रव्याणि | कालाः | ऋतुश्च |
|---|---|---|---|---|
| सूर्यः | स्थूलवस्त्राणि | ताम्रः | अयनम् | ग्रीषमः |
| चन्द्रः | नूतनवस्त्रम् | मणिः | मुहूर्त्तः | वर्षाः |
| कुजः | जीर्णवस्त्राणि | सुवर्णः | दिनम् | ग्रीष्मः |
| बुधः | सुजलवस्त्राणि | मिश्रितः | ऋतुः | शरद् |
| गुरुः | नातिजीर्णं नातिनवम् | रजतम् | मासः | हेमन्तः |
| शुक्रः | चिरस्थायि | मुक्ता | पक्षः | वसन्तः |
| शनिः | जीर्णवस्त्राणि | लोहः | वर्षः | शिशिरः |

## 4.18. ग्रहाणां वेदाधिपतिज्ञानम्

| वेदाः | ऋग्वेदः | यदुर्वेदः | सामवेदः | अथर्ववेदः |
|---|---|---|---|---|
| ग्रहाः | गुरुः | शुक्रः | कुजः | बुधः |

## 4.19. ग्रहाणां देवलोकाधिपतिज्ञानम्

योऽयं जातकः स कस्माद् आगताः सन्ति इति ज्ञातुम् अस्य आवश्यकता भवति। तद्यथा-

| देवलोकः | मर्त्यलोकः | पितृलोकः | तिर्यङ्लोकः | नरकलोकः |
|---|---|---|---|---|
| गुरुः | चन्द्रः | शुक्रः | सूर्यः,कुजः | बुधः,शनिः |

## 4.20. ग्रहस्वरुप निरुपणम्

### 4.20. 1. सूर्यस्वरूपम्

सरति आकाशे सुवति कर्मणी लोकं प्रेरयति वा इति सूर्यः। वेदेऽपि - **एष वै ग्रहः य एष तपति, येनेमाः प्रजाः गृहीताः** (शत.ब्रा.-4-6-5-1)।

अयं सूर्यः कालपुरुषस्यात्मा, विश्वस्य राजा, रक्तश्यामवर्णोऽग्निदेवताकः, पुल्लिङ्गः, क्षत्रियवर्णः, सत्त्वप्रकृतिको, मधुपिङ्गलनेत्रः, चतुरस्त्र-शरीरः, शुचिः, पित्तस्वभावः, धीमान्, अल्पकेशः, अस्थिस्वामी, देवालयाधिपः, समयेऽयनाधिपतिः,

कटुरसः, पूर्वदिशि, दिवसे च बलवान्, स्थूलवृक्षोत्पादकः, रक्तक्षौमवस्त्रः, ग्रीष्मर्तुस्वामी, मूलसंज्ञकः, सिंहराश्याधिपतिः,

### 4.20.2. चन्द्रस्वरूपम्

चन्द्रो हि कालपुरुषस्य मनः गौरगात्रः, जलदेवताकः, वैश्यः स्त्रीलिंगः, सत्त्वस्वभावः, बहुवातकफः, प्राज्ञः, शरीरे रक्ताधिपतिः, जलस्थानस्वामी, समये मुहूर्त्तधिपः, लवणरसः, उत्तरदिशि निशायां च बलवान, दुग्धवृक्षोत्पादकः, वर्षर्तुस्वामी, क्षौमवस्त्रः, धातुसंज्ञकः, मित्रप्रियः, वृद्धस्त्रीषु रतः, सुन्दरः, शुभ्राम्बरः एवं विधः चन्द्रमाः।

### 4.20. 3.भौमस्वरूपम् –

मङ्गलग्रहः कालपुरुषस्य सत्त्वम्, रक्तवर्णः, सेनापतिः, क्षत्रियः, तमः स्वभावः, क्रूर रक्तनेत्रश्चञ्चलः, पित्तप्रकृतिकः, क्रोधी, कृशो, मध्यदेहश्चोदारहृदयः, अग्निस्थानस्वामी, तमोगुणीः, तिक्तरसः, कटुवृक्षोत्पादकः, रक्तवस्त्रः, ग्रीष्मर्तुस्वामी, शूरः, दीप्तकेशः, तरुणः, साहसिकोऽपी, संरक्तगौरः, एवं विधः कुजः।

### 4.20.4. बुधस्वरूपम्

बुधस्तु कालपुरुषस्य वाणी, दूर्वाश्यामवर्णः, रक्तवर्णः, नपुंसक, वैश्यः, श्रेष्ठशरीरः, श्लिष्टवाक्यः, हास्यप्रियः, वातपित्तकफदोषत्रययुतः, पूर्वदिशि च अहोरात्रे बलवान, निष्फलवृक्षोत्पादकः, कृष्णक्षौमवस्त्रः, रजःस्वभावः, मूलसंज्ञकः, रूपवान्, पालाशवाशा, युवराजश्च कथितः ।

### 4.20.5. गुरुस्वरूपम्

कालपुरुषस्य ज्ञानसूखात्मकः, गौरवर्णः, मन्त्री, ब्राह्मणः, विशालदेहः, पिङ्गलकेशनेत्रः, काञ्चनवपुः, कफप्रकृतिकः, धीमान्, सर्वशास्त्र-विशारदः, शरीरेवसास्वामी, कोशस्थानाधिपः, मधुरसः, सफलवृक्षोत्पादकः, पीताम्बरः, सत्त्वस्वभावः, चतुरः, विनीतः, तीक्ष्ण दृष्टिः, बलवान्, तनुर्मेदः प्रधानो गुरुः स्यात् ।

### 4.20.6. शुक्रस्वरूपम्

शुक्रो हि कालपुरुषस्य वीर्यात्मको, मन्त्री, श्यामशरीरः, स्त्रीलिङ्ग, विशालनेत्रः, जलतत्त्वो, ब्राह्मणः, रजः प्रकृतिकः, सुखी, कान्तवपुः, श्रेष्ठः, सुलोचनः, काव्यकर्ता, कफवातप्रकृतिकः, वक्रकेशः, शरीरे शुक्रस्वामी, शयन-स्थानाधिपः, पुष्पवृक्षोत्पादकः, क्षौमवस्त्रः, कामी, लीलावान्मतीः, बुद्धिमान्, स्थूलांस देशः,

कलत्रकार्मुकसुखगीतशास्त्रकाव्यपुष्पसुकुमारयौवनाभरणरजतयानगर्वलोकभौक्तिकविभवक वितारसविवाहादीनां वस्तूनां कारकः, एवं विधः सितः ।

### 4.20.7. शनिस्वरूपम्

अयं हि कालपुरुषस्य दुःखस्वरूपः, कृष्णवर्णः ब्रह्मदेवताकः, नपुंसकः, वायुतत्त्वः, शूद्रः, स्यूलदन्तो, अलसः, पङ्गुः, खररोमकचः, कृशो दीर्घतनुः, पिङ्गलनेत्रः, वातप्रकृतिकः, शरीरे स्नायुस्वामी, मलिनः, अपवित्रः, कुत्सितवृक्षोत्पादकः, चित्रपदृवस्त्रः, मूर्खः, क्रोधीः, रोद्रः, मूलधातुसंज्ञकः, सर्वग्रहेषु वृद्धस्तथायुर्वृद्धिप्रदायकः, तमः स्वभावो एवं विधः शनिः ।

### 4.21. ग्रहाणां मैत्रीविचारः –

### 4.21.1 ग्रहाणां नैसर्गिकं मित्रामैत्रीविचारः

लोके यथा मित्राणि, शत्रवः समश्च व्यवहारे भवन्ति । तद्वदेवं ग्रहाणां अपि भवन्ति। अर्थात् कस्यचित् ग्रहस्य केचन मित्राणि, कश्चित् शत्रुः समश्च सन्ति । स्पष्टार्थं चक्रं प्रदर्श्यते । तद्यथा –

**नैसार्गिक मित्रसमशत्रुविभागचक्रम्**

| र | चं | मं | बु | बृ | शु | श | ग्रहाः |
|---|---|---|---|---|---|---|---|
| मं.बृ चं | सू बु | रं, चं बृ | सू शु | र चं मं | श बु | शु बु | मित्राणि |
| बु | मं वृ शु, श | शु, श | श, म बृ | श | मं, बृ | बृ | समाः |
| शु, श | X | बु | चं | शु बु | चं र | सू, चं मं | शत्रवः |

उपरि वर्णिताः ग्रहाणां नैसर्गिक (स्थायी रूपेण) मित्रसमशत्रवः सन्ति। अधुना विचारयामः तात्कालिक मित्रामित्रम्।

### 4.21. 2. तात्कालिक मैत्रीविचारः –

एवं नैसर्गिकमित्रादिविभागम् उक्त्वा पुनः आचार्यैः तात्कालिक मैत्रीः ततो पञ्चधामैत्री विचारः कृतः ।

जातकपत्रे यः ग्रहः यस्मिन् स्थाने विद्यमानो भवति तस्मात्। अतेव उच्यते ग्रहाः स्वाधिष्ठात् – स्थानात् द्वितीय, तृतीय, चतुर्थ एवं द्वादश, एकादश दशमस्थाः मित्राणि,

प्रथमपञ्चमषष्ठसप्तमाष्टनवमश्च शत्रवः भवन्ति। ( मित्राणि - 2, 3, 4, 12, 11, 10 - शत्रवः - 1, 5, 6, 7, 8, 9, )

### 4.21.3. पञ्चधा मैत्रीविचारः

**पञ्चधा मैत्री चक्रम्**

| नैसर्गिरुपेण | | तात्कालिकरुपेण |
|---|---|---|
| मित्र | + | मित्र = अधिमित्र |
| मित्र | + | सम = मित्र |
| मित्र | + | शत्रुः = समः |
| सम | + | शत्रुः = शत्रुः |
| शत्रुः | + | शत्रुः = अधिशत्रुः |

अयं भावोऽत्र नैसर्गिको यदि कश्चिद्ग्रहो मित्रं तात्कालिकेऽपि मित्रं तदा अतिमित्रम्। एवमेव यदि नैसर्गिके समः तात्कालिके च मित्रं तदा मित्रमित्यादि ज्ञेयम् ।

### 4.22.1. गृहाणां दृष्टिविचारः –

होराशास्त्रे दृष्टिस्थानस्य विचारः प्रमुखं वर्तते। अशुभस्थानस्थितोऽपि ग्रहः प्रबलस्य शुभग्रहस्य दृष्टिवशात् शुभो भवति। उदा – प्रबलस्य गुरोः दृष्टिवशात् क्रूरग्रहस्य दुष्प्रभावः न्यूनतां याति। अतः जातकचक्र अवलोकनावसरे दृष्टिविचारोऽयमत्यन्तमनिवार्यः।

सर्वेषामपि ग्रहाणां सप्तमस्थाने पूर्णदृष्टिः भवति। सर्वे ग्रहाः तृतीयदशमस्थाने एक पाददृष्ट्या = 3–10। नवमपञ्चमस्थाने द्विपाददृष्ट्या=9–5। चतुर्थाष्ट्मस्थाने त्रिपाददृष्ट्या = 4 – 8। सप्तमस्थानञ्च – पूर्णदृष्ट्या पश्यन्ति = 7

### 4.22.2. ग्रहाणां विशेषदृष्टिः

अत्र पुनः ग्रहाणां विशेषदृष्टिः प्रोक्ताः । शनि-गुरु-कुजानां त्रिदशत्रिकोणचतुरस्त्रस्थानेषु क्रमशः विशेषदृष्टिः भवति। तद्यथा -

तृतीयदशमस्थाने शनिः = 3 – 10 । नवमपञ्चमस्थाने गुरुः = 9 – 5 । चतुर्थाष्टमस्थाने भौमश्च पूर्णदृष्ट्या पश्यन्ति = 4 – 8 । पुनः सूर्यः, चन्द्रः, बुधः, शुक्रः सप्तमस्थानं पूर्णदृष्ट्या पश्यन्ति शुभं फलं प्रयच्छन्ति । स्पष्टार्थं सारणिं प्रस्तूयते-

| स्थानानि | दृष्टिप्रमाणम् |
|---|---|
| 3-10 | पाददृष्टिः |
| 5 – 9 | अर्द्धदृष्टिः |
| 4 – 8 | पादोनदृष्टिः |
| 7 | पूर्णदृष्टिः |

पाददृष्टिर्नाम पादबलमिति। एवमेवान्यत्रापि ।

| ग्रहाः | विशेषदृष्टिस्थानानि |
|---|---|
| शनिः | 3 – 10 |
| गुरुः | 5 – 9 |
| कुजः | 4 – 8 |

**पश्यन्ति सप्तमं सर्वे शनिजीवकुजाः पुनः ।**

**विशेषतश्च त्रिदशत्रिकोणचतुरष्टमान् ।। ( लघुपाराशरी )**

### 4.23. ग्रहाणां बलनिरूपणम् –

ग्रहाणां स्थानस्थितिवशात् विविधाः योगाः उत्पद्यन्ते योगानां बलाबलपरीक्षणाय अनेकानि बलानि होराग्रन्थेषु प्रोक्तानि सन्ति फल निर्णय विधाने। अत्र सारावली ग्रन्थैः सप्तविधं बलं प्रोक्तानि सन्ति। ते भवन्ति -

1. दिग्बलम्
2. स्थानबलम्
3. कालबलम्
4. चेष्टाबलम्
5. द्रेष्काणबलम्
6. त्र्यंशबलम्
7. निसर्गबलम्

### 4.23.1 दिक्बलम् –

**दिक्स्थानकालचेष्टाकृतं बलं सर्वनिर्णयविधाने।**

**वक्ष्ये चतुःप्रकारं ग्रहस्तु रिक्तो भवेदबलः।।**

**लग्ने जीवबुधौ दिवाकरकुजौ व्योम्नि स्मरे भास्करि-**


**र्बन्धाविन्दुसितौ दिशाकृतमिदं स्वोच्चे स्वकोणे स्वभे ।**

**मित्रस्वांशकसंस्थितः शुभफलैर्दृष्टो बलीयान्ग्रहः**

**स्त्रीक्षेत्रे शशिभार्गवौ नरगृहे शेषा बले स्थानजे ।।**

गुरुबुधौ लग्ने पूर्वे च, सूर्यभौमौ दशमे दक्षिणे च, शनिः सप्तमे पश्चिमे च, चन्द्रशुक्रौ चतुर्थे चोत्तरे च बलिनौ स्तः ।

**दिग्बलचक्रम्**




### 4.23.2. स्थानबलम् –

स्थानबलं नाम ग्रहाः कस्मिन् स्थानस्थितः बलीयान् सन् जातकाय शुभफलं प्रयच्छति इति । सर्वेग्रहाः स्वोच्चे, स्वकोणे, स्वगृहे, मित्रगृहे, स्वनवांशे संस्थितः, शुभ ग्रहाणां दृष्टिः वशात् स्थानबलं प्राप्नोति । चन्द्रशुक्रौ स्त्री क्षेत्रे शेषाः पुरुषगृहे बलीनो भवन्ति।

**स्थानबलविचारे इतोऽपी केचन मुख्यांशाः वर्तन्ते । तद्यथा –**

सर्वे ग्रहाः स्वोच्चराशो बलिनो भवन्ति।

सम्पूर्णपक्षबलयुक्तः चन्द्रः बलवान् भवति शुभफलञ्च प्रयच्छति।

कुजादिपञ्चताराग्रहाः यदा वक्रिणो भवन्ति – तदा पूर्णबलिनो भूत्वा शुभफलदा भवन्ति।

### 4.23.3. कालबलम् –

**जीवार्कस्फुजितोऽह्नि विच्च सततं मन्देन्दुभौमा निशि ।**
**होरामासदिनाब्दपाश्च बलिनः सौम्याः सितेऽन्येऽसिते ।**
**स्सङ्ग्रामे जयिनो विलोमगतयः संपूर्णगावो ग्रहाः**
**सूर्येन्दू पुनरुत्तरेण बलिनौ सत्योक्तचेष्टाबले ।।**

समयस्य अवयवाः भवन्ति दिवस, रात्रि, होरा, घटी इत्यादयः। तर्हि नवग्रहेषु गुरुः, सूर्यः, शुक्रः दिवा- बलिनो भवन्ति । शनिः, चन्द्रः, कुजः शनीः रात्रौबलिनो भवन्ति।

ग्रहेषु बुधः केवलम् अहर्निशः कालबल युक्तः भवति । एतद् विहाय सर्वे शुभग्रहाः स्वीयहोरायां, स्वीयवर्षे, स्वीयमासे तथा स्वीयदिवसे बलिनो भवन्ति । शुक्लपक्षे शुभग्रहाः तथा कृष्णपक्षे क्रूरग्रहाः बलिनः भवन्ति ।

### 4.23.4. चेष्टाबलम् –

परिस्थिति वशात् ग्रहाः चेष्टाबलयुक्ताः भवन्ति । शुक्र-बुध-मङ्गल-गुरु तथा शनैश्चराः ग्रहयुद्धे विजयिनः स्युः, अथवा वग्रगतिकः स्युः। सम्पूर्ण किरणेन युक्तः ग्रहः उत्तर दिक् चेष्टा बलेन पूर्ण बलिः भवति । तथा च शुक्रः - मंगलः – सूर्यः - गुरुः उत्तरायणे, चन्द्रः - शनिः दक्षिणायने, बुधः स्ववर्गस्थः द्वयेऽपि बलिनः भवति ।

### 4.23.5. द्रेष्काणबलम् –

पुरुषसंज्ञकाः ग्रहाः प्रथम द्रेष्काणे बलिनः भवन्ति। स्त्रीसंज्ञकाः ग्रहाः मध्य द्रेष्काणे बलिनो भवन्ति। नपुंसकग्रहाः तृतीय द्रेष्काणे बलिनः भवन्ति।

### 4.23.6. त्र्यंशबलम् –

चन्द्रः रात्रेः प्रथमभागे, शुक्रः रात्रेः द्वितीयभागे, कुजः रात्रेः तृतीयभागे बलिनः भवन्ति। बुधः प्रातः प्रथमभागे, सूर्यः मध्याह्ने, शनिः सायंकाले, गुरुः अहर्निशः पूर्णबलीनः भवन्ति।

### 4.23.7. नैसर्गिकबलम् –

वर्षमास-दिनहोराणां स्वमिनः क्रमादुत्तरोत्तरं बलिनः भवन्ति । शनिमङ्गलबुधगुरुशुक्र-चन्द्रादित्यश्चैतेऽप्युत्तरोत्तरं बलिनो निगदिताः। अर्थात् सर्वतो हीनबलः शनिः । ततो अधिकः बलवान् कुजः । ततः अधिकः बलवान् बुधः । ततो अधिकः बलवान् गुरुः, ततो शुक्रः, ततो चन्द्रमाः, ततो रविः । नैसर्गिक बले सर्वाधिकः बलीयान् रविः । सर्वतो हीनः शनिः ।

### 4.24.बोधप्रश्नाः

1. ग्रहाणां स्वरूपगुणादयः (एकैकं पृथक्तया ) विवेचनीयाः ।

2. ग्रहाणां बलविचारः कुरुत ।

3. ग्रहाणाम् आत्मादिराजादि च संज्ञाः लेखनीयाः ।

4. ग्रहाणां सामान्यदृष्टिः,विशेषदृष्टिः च विवृणुत ।

5. केन्द्रादिसंज्ञाः विशदयत ।

6. चरस्थिर-उभयराशयः के लिखत ।

7. ग्रहाणां उच्चनीचपरमोच्चनीचस्थानानि लिखत ।

8. ग्रहाणां मैत्रीविचारः कुरुत ।

9. ग्रहाणां स्थानानि लिखत ।

**पञ्चमः खण्डः**

**मिश्रसंज्ञकाध्यायः**

**संरचना**

5.1 प्रस्तावना
5.2 लक्षिताधिगमविशेषाः
5.3. ग्रहाणां दीप्ताद्यवस्थाः – स्थितिः तेषां फलञ्च
5.4. बलविचारे विशेषः
5.5. फलविचारे चन्द्रस्य वैशिष्ट्यम्
5.6. राशिस्वरस्य फलम्
5.7. राशिषु उच्चादिकस्य बलम्
5.8. उच्चादिवशेन फलेषु ग्रहाणां शुभाशुभत्वं विचारः
5.9. ग्रहाणां बलप्रमाणम्
5.10. बोधप्रश्नाः
5.11. उच्चादिबलयुक्तग्रहाणां फलानि
5.12. स्वद्रेष्काणादिबलयुक्त ग्रहाणां फलानि
5.13. स्थान-दिक्-चेष्टायनादिबल युक्त ग्रहाणां फलानि
5.14. वक्रग्रहफलम्
5.15. राज्यप्रदयोगः
5.16. ग्रहाणां दिवा-रात्रि फलम्
5.17. वर्षेशादिबलयुक्तग्रहाणां फलम्
5.18. पक्षबलयुक्त ग्रहफलम्
5.19. सर्वबलयुक्तग्रहाणां फलम्
5.20. बलयुक्तशुभग्रहफलम्
5.21. बलयुक्त-अशुभग्रहफलम्
5.22. ग्रहाणां मित्रादिक्षेत्रसम्बन्धेन बलादि संज्ञा फलानि च
5.23. ग्रहाणां पुंस्त्री गृह सम्बन्धेन शुभ फलम्
5.24. बोधप्रश्नाः

**5.1.प्रस्तावना -**

ज्योतिश्शास्त्रे अध्यायोऽमत्यन्तं मुख्यो भवति। अत्र रव्यादिग्रहाणां अवस्थाः स्थितिः तेषां फलान्युच्यन्ते। फलकथनावसरे आदौ अस्माभिः दृश्यते यत् कः ग्रहः कस्मिन् स्थाने, कस्मिन् भावे, कस्य वर्गे तिष्ठन्ति इत्येतदनुसृत्य फलभेदः जायते। तादृशफलानामत्र विचारः क्रियते। विविधस्थानाश्रितस्य फलानि विव्रियते क्रमेण।

## 5.2. लक्षिताधिगमविशेषाः

ग्रहाणां दिप्ताद्यवस्थाः –स्थितिः तेषां फलानि ज्ञायन्ते ।

फलविचारे चन्द्रस्य वैशिष्ट्यं ज्ञातुं शक्नोति।

ग्रहाणां बलप्रमाणम् अवगच्छति ।

वक्रग्रहफलम् ज्ञायन्ते।

## 5.3. ग्रहाणां दीप्ताद्यवस्थाः – स्थितिः तेषां फलञ्च

ग्रहाणां दीप्तादयः नव अवस्थाः भवन्ति। तद्यथा – 1.दीप्तावस्थाः 2.स्वस्थावस्था 3. मुदितावस्था 4. शान्तावस्था 5. शक्तावस्था 6. पीडितावस्था 7. भीतावस्था 8. विकलावस्था 9. खलावस्था चेति ।

1. स्वोच्चस्थितग्रहस्य दीप्तावस्था भवति।
2. स्वराशिस्थितग्रहस्य स्वस्थावस्था ।
3. मित्रक्षेत्रस्थितस्य मुदितावस्था।
4. शुभग्रहवर्गस्थितस्य शान्तावस्था।
5. स्पष्टरश्मियुतस्य अर्थात् सम राशि स्थितः ग्रहस्य शक्तावस्था ज्ञेया।
6. अस्तंगतस्य अर्थात् सूर्यसान्निध्य वशात् ग्रहस्य विकलावस्था।
7. अन्यग्रहप्रभावितस्य पीडितावस्था।
8. पापग्रहवर्गयुक्तस्य खलावस्था ।
9. नीचराशिस्थितस्य भीतावस्था।

अवस्थानां नामानुसारमेव प्रायः तेषां फलान्यपि भवन्ति। स्पष्टार्थं दीप्ताधवस्थानां स्थितिः – फलानि च सारण्यां प्रदीयत्ते । तद्यथा –

| क्रमः | अवस्थाः | ग्रहस्थितिः | फलानि |
|---|---|---|---|
| 1 | दीप्तावस्था | उच्चस्थितिः | प्रतापवान्, शत्रुविजयी, लक्ष्म्यालिङ्गित शरीरः, गजमदसंसिक्त, मणिमाणिक्यमुक्तादियुक्तः, भूपृष्ठः विचरति । |
| 2 | स्वस्थावस्था | स्वरशिस्थितिः | रत्नयुक्तः, सम्पन्नः, प्रभुः, गृहधान्य, कुटुम्ब परिवृद्धिं करोति । |
| 3 | मुदितावस्था | मित्रगृहस्थितिः | विलासिनः, प्रशान्तचित्तः, भोगी । |
| 4 | शान्तावस्था | शुभवर्गस्थितिः | प्रशान्तचित्तः, सचिवः, सुखः, धार्मिकः, विद्वान्, परोपकारी, सुख धन भागी, महीपतिः । |

| | | | |
|---|---|---|---|
| 5 | शक्तावस्था | बलवान् | विख्यातः, वैभवसम्पन्नः, वितत कीर्तिमान्, लोकप्रियः, सदा स्त्रीवस्त्रमाल्य गन्धैर्विलसति । |
| 6 | पीडितावस्था | युद्धे पराजितः | शत्रुपीडितः, रोगी, प्रवासी, बन्धु वियोगाभिः संतप्तः देशाद्देशं विचरति । |
| 7 | भीतावस्था | नीचराशिस्थः | दुर्बलः, शत्रुपीडितः, दीनः । |
| 8 | विकलावस्था | अस्तङ्गतः | स्वस्थान परिभ्रष्टः, मलिनः, अनाचारी, दरिद्रः, प्रवासी, शत्रुपीडितः, भीतः । |
| 9 | खलावस्था | पापवर्गस्थः | परदारलम्पटो, स्त्री हरणा दुःख तप्तः, नीचवृत्तिनिरतः, समस्त धननाशः, कलुषितमनस्कः, शोकार्तश्च कथमपि शोकभारं न जहाति । |

### 5.4. बलविचारे विशेषः

सर्वे ग्रहाः स्वेच्चाश्रिताः श्रेष्ठ बला, मूलत्रिकोणे स्वगृहे च मध्य बला, शुभग्रहेण युति – दृष्टिः मित्रगृहाश्रिता वा ग्रहाः अल्पबलीनः भवन्ति ।

### 5.5. फलविचारे चन्द्रस्य वैशिष्ठ्यम् -

**शुक्लप्रतिपद्देशक मध्यबलः कीर्त्यते यवनवृद्धैः ।**

**श्रेष्ठो द्वितीयदशेक स्वल्पबलश्चन्द्रमास्तृतीये च**

**आहितकलासमूहः प्रसन्ननिजमण्डलः सुपरिपूर्णः**

**अप्रतिहतमिह कुरुते भूपतिबलमुडुगणाधिपतिः ।।**

फलविचारे चन्द्रस्य प्रमुखं स्थानं भजते । नवग्रहेषु सोमो भूमेरत्यन्तं सन्निहितः खगोलीयबन्धुः यथा सूर्यः तापप्रचण्डतप्ताकारः किन्तु चन्द्रः जलरूपपिण्डः। अर्थात् चन्द्रमसि जलीयतत्त्वानां तरलरसरूपाणाम् आधिक्यं वर्तते। चन्द्रस्य स्वयं प्रकाशः न विद्यते। स च पुनः सूर्यकिरणसंस्पर्शादिव प्रकाशते। अतएव कथ्यते **सुषुम्नः सूर्यरश्मिचन्द्रमा-** ( ऋ.वे. 1-115-03) सूर्यरश्मिभिश्चन्द्रः प्रकाशते।

अयं चन्द्रः शीतलां द्युतिम् आत्मीयां विकिरन् जागतिकान् सर्वान् चेतनान् अचेतनान् लोकान् प्रभावयति स्वचन्द्रकिरणजालेन। वस्तुतः चन्द्रकिरणानां सूक्ष्मप्रभावेण मनः प्रसन्नकरं भवति, जलं तरङ्गायते। अनेन ज्ञायते यत् सर्वेषां सचेतनानां प्राणिनां मनस्तत्त्वनिर्माणे चन्द्रस्य तेजः महत्त्वपूर्णतां भजते।

शुक्लप्रतिपद्दशके मध्यबलः, द्वितीयेद्दशके श्रेष्ठो, तृतीये दशके चन्द्रमा स्वल्प बलः इति यवन वृद्धैः कथ्यते।

आहितकलासमूहप्रसन्न निजमण्डलः सुपरिपूर्णा उडुगणाधिपति (नक्षत्राधिपति) भूपतिबलं प्रतिहतमिह कुरुते। स्पष्टार्थं अधः क्रमेण लिख्यते -

चन्द्रः प्रथम दशके = मध्यबलः।

द्वितीये दशके = श्रेष्ठबलः।

तृतीये दशके = स्वल्प बलः

1. प्रथम दशकः = शुक्लप्रतिपदातः 1 – 10 दशमि पर्यन्तं मध्यबलिः।
2. द्वितीय दशकः = शुक्लएकादशीतः 11 – 15 कृष्णपञ्चमी पर्यन्तं श्रेष्ठबलिः।
3. तृतीय दशकः = कृष्णपञ्चमीतः 5 – 15 अमावस्या पर्यन्तम् अल्पबलिः।

यस्य जातकस्य जन्मकाले चन्द्रः षोडशकला परिपूर्णः ( चन्द्रपूर्णरश्मियुक्तः ) भवति चेत् अक्षय बलं प्रयच्छन्ति अपि च सः जातकः भूपति सदृशः बलवान् भवति।

### 5.6. राशिश्वरस्य फलम् –

1. चन्द्रराशेर्नाथो लग्नाधिपोऽपि वा सुर मन्त्री ( गुरुः ) सहिता जन्मनि केन्द्रे स्यात् तदानीं जातकस्य मध्यावस्थायां सुखं भवति।
2. राशेश्वराः बलवान् चेत् नक्षत्रभेदफलं परिकल्प्य युगपत् फलप्रवचनं करणियम्। यदि एकस्मिन्नेव समये फलद्वयस्य प्रप्तिः स्यात् तदानिं बलाधिक्यं दृष्टवा फनिर्णयः कर्तव्यः।
3. लग्न तथा ग्रहबलसाम्येन निसर्गज बलस्य विचारः करणियः। लग्नस्य बलं लग्नाधिपतितुल्यं भवति।

### 5.7. राशिषु उच्चादिकस्य बलम्

**उच्चबलं कन्यायां बुधस्य तुङ्गांशकैः सदा चिन्त्यम्।**

**परतस्त्रिकोणजातं पञ्चभिरंशैः स्वराशिजं परतः॥**

**उच्च भागत्रितयं वृष इन्दोश्च त्रिकोणमपरेंऽशाः।**

**द्वादशभागा मेषे त्रिकोणमपरे स्वभं तु भौमस्य॥**

**दशभागा ईज्यस्य च त्रिकोणमपरे स्वभं चापे ।**

**शुक्रस्य तु त्रिकोणं पञ्चभिरपरे स्वभं जूके ।।**

**विंशतिरंशाः सिंहे त्रिकोणमपरे स्वभवनमर्कस्य ।**

**कुम्भे त्रिकोणनिजभे रविजस्य यथा रवेः सिंहे ।।**

अत्र ग्रहाणां राशिषु उच्चबलं कथ्यते। बुधस्य कन्यायां तुङ्गांशकैः (पञ्चदशभिरंशैः ) उच्चबलं सदा चिन्त्यम्, तथैव पञ्चभिः अंशैः त्रिकोणबलं, अवशिष्टाः दश अंशैः स्वराशिजलं बलं चिन्त्यम्। एवमेव अन्येषां ग्रहाणां अपि राशिषु उच्चादिबलं चिन्तनियम्। स्पष्टार्थं सर्वेषां ग्रहाणां राशिषु उच्चादिबल सारणी प्रदीयन्ते तद्यथा -

| **राशिः** | **ग्रहः** | **अंशः** | **बलम्** |
|---|---|---|---|
| कन्या | बुधः | 1 – 15 | उच्चबलम् |
| | | 16 – 20 | त्रिकोणबलम् |
| | | 21 – 30 | स्वराशि बलम् |
| वृषः | चन्द्रः | 1 – 3 | उच्चबलम् |
| | | 4 – 30 | मूलत्रिकोणबलम् |
| मेषः | कुजः | 1 – 12 | मूलत्रिकोणबलम् |
| | | 13 – 30 | स्वगृहबलम् |
| धनुः | गुरुः | 1 – 10 | मूलत्रिकोणबलम् |
| | | 11 – 30 | स्वराशिबलम् |
| तुला | शुक्रः | 1 – 5 | मूलत्रिकोणबलम् |
| | | 6 – 30 | स्वगृहबलम् |
| सिंह | सूर्यः | 1 – 20 | मूलत्रिकोणबलम् |
| | | 21 – 30 | स्वगृहबलम् |
| कुम्भः | शनिः | 1 – 20 | मूलत्रिकोणबलम् |
| | | 21 – 30 | स्वगृहबलम् |

## 5.8. उच्चादिवशेन फलेषु ग्रहाणां शुभाशुभत्वं विचारः

इदनीं ग्रहाणाम् उच्चादि स्थानवशात् फलविचारः कुर्मः। यः ग्रहः उच्चराशिगतः अभिवृद्धिं कारयति। तेन जातकः प्रभूतं धनं, सम्मानं, ऐश्वर्यं, प्रभूतं धनं, सम्पन्नः, राजतुल्य प्रतिभा प्रसाधयति। मूलत्रिकोणेस्थितः ग्रहः बलवान् साचिव्यं बलपतित्वं प्रसाधयति।

स्वस्थानगतः ग्रहः चेत् जातकः उन्नतः भवति येन सुखं, प्रतिष्ठां, ऐश्वर्यं, प्रभूतं धनं सम्पादयति।

मित्रबलेनयुक्तः ग्रहः चेत् जातकः यशस्वी भवति।

स्वराशिबलयुक्तः ग्रहः चेत् जातकः प्रमुदितः, धनधान्ययुक्तः भवति।

निज होरा बल युक्तः तेजस्वी, सुभगं, सुस्थिरं, विभवं, अधिकं धनं पुरुषं जनयति।

## 5.9. ग्रहणां बलप्रमाणम् –

- सर्वे ग्रहाः स्वोच्चराशौ पूर्णशुभबलिनो भवन्ति ।
- निचराशिस्थाः ग्रहाः शुभफलानां विनाशः कुर्वन्ति ।
- शत्रुराशिस्थः ग्रहः अत्यल्पम् अर्थात् शून्यसमं बलं प्राप्नोति ।
  स्वक्षेत्रे स्थितः चतुर्थांशबलम् ।
- स्वक्षेत्रे स्थितः ग्रहः अर्द्धं बलं सम्पादयति ।
- मूलत्रिकोणस्थानेषु स्थितः ग्रहः पादोनबलं प्राप्नोति ।
- एवमेव यदि पापग्रहाः नीचराशौ चेत् पूर्णपापफलं ददाति ।
- शत्रुराशिस्थः अभुभफलम्

नीचराशिस्थः औत्पातिकाः, सावितृ, लुप्तकरा, अस्तङ्गतो, युद्धे पराजितः शुभफलानि विनाशयन्ति पापानि तानि सुतरां परिवर्धयन्ति तद्यथा सारावल्याम् -

**स्वोच्चस्थितः शुभफलं प्रकरोति पूर्णं**

**नीचर्क्षगस्तु विफलं रिपुमन्दिरेऽल्पम् ।**

**पादं शुभस्य हितभे स्वगृहे तदर्धं**

**पादत्रयं गगनगः स्थितवांस्त्रिकोणे ।**

**निचर्क्षगः सकलमेव करोति पापं**

**न्यूनं च किंचिदरिभे विफलं स्वतुङ्गे।**

पादत्रयं हितगृहे विहगोऽशुभस्य
स्वर्क्षे दलं च चरणं स्थितवांस्त्रिकेणे ।।
औत्पातिकाः सवितृलुप्तकरा विरूक्षा
नीचं गता रिपुगृहं च नभश्चरेन्द्राः।
युद्धे जिताः शुभफलानि विनाशयन्ति
पापानि यानि सुतरां परिवर्धयन्ति ।।

## 5.10. बोधप्रश्नाः

1. ग्रहाणां दीप्ताद्यवस्थाः फलानि च सप्रमाणं विशदनीयाः ।

2. सप्तबलानि कानि विशदयत ।

3. राशिश्वरस्य फलं विवेच्यत ।

4. उच्चादिवशेन फलेषु ग्रहाणां शुभाशुभत्वं विचारः कुरुत ।

5. ग्रहाणां बलप्रमाणं निरूपयत ।

## 5.11. उच्चादिबलयुक्तग्रहाणां फलम् –

- उच्चबलेन समेतः ग्रहः पुरुषां परां ऐश्वर्यं प्रसाधयति ।
- त्रिकोण बलवान् ग्रहः साचिव्यं, सेनाधिपतित्वं प्रसाधयति ।
- स्वर्क्षे बलवान् ग्रहाः प्रमुदितः धनधान्यसम्पदा ददाति ।
- मिश्रक्षेत्र बलयुक्तः ग्रहः कीर्तीः प्रसाधयति ।
- निज होरा बलयुक्तः ग्रहः पुरुषां तेजस्वी, सुभगं, वैभवादि युक्त राजा, धनप्राप्ति, पुरुषार्थं करोति।

### 5.12. स्वद्रेष्काणादिबल युक्त ग्रहाणां फलानि -

- ❖ स्वद्रेष्काण बलयुक्तः ग्रहः जातकाय गुणभाजनं कुरुते ।
- ❖ स्वनवांशक बलयुक्तः ग्रहः पुरुषं प्रसिद्धिं च करोति ।
- ❖ स्वसप्तमांशक बलयुक्तः ग्रहः साहसिकं, कीर्तिवान् तथा च धनाढयं कुरुते ।
- ❖ द्विरसांशबलसमेतः ग्रहः पुरुषं कर्मरतं, परोपकारं च करोति ।
- ❖ त्रिशांश बलेन सौख्यं, गुणान्वितं कुर्यात् ।
- ❖ शुभग्रहाणां दर्शन बलसहितः पुरुषं धनान्वितं, ख्यातं, सुभगं, यशस्वी, सुसौख्यं च कुर्यात् ।
- ❖ पुंस्त्रीभवनबलेन च पुरुषं जनपूजितं ,कला कुशलं, प्रसन्नचित्तं, कल्यं, परलोकभीरुं च करोति ।

### 5.13. स्थान-दिग्-चेष्टायनादिबल युक्त ग्रहणां फलानि -

- स्थानबलेन समेतः स्थितिः, सौख्यः, मित्रः, भाग्यवान्, स्थिर चित्तः, स्वत्तन्त्रकर्मा च मनुजः भवेत् ।
- आशबलसमुपेतो ग्रहः जातकस्य स्व दिशं नयति नीत्वा वस्त्राभूषणवाहनसौख्यान्वितं कुरुते।
- आयनबलेन युक्तः ग्रहः स्वदिशि विविधार्थसङ्गमं करोति ।
- चेष्टावीर्यसमन्वितः ग्रहः जातकाय क्वचित् राज्यं, क्वचित्पूजां, क्वचिद्द्रव्यं, क्वचिद्यशः चित्रं च ददाति ।

### 5.14. वक्रग्रहफलम् -

शुभग्रहः, वक्रः तर्हि सम्मानं प्रभूतं धनं, राज्यप्रदं ददाति । एवमेव पापग्राहः वक्रः चेत् कष्टप्रदाः, व्यसनप्रदाः, वृथाटनं च कारयन्ति ।

### 5.15. राज्यप्रदयोगः –

स्फुटरश्मियुक्तः युद्धे विजयी ग्रहो पुंसां स्वस्थशरीरसमागं, शुभं राज्यप्रदं, शत्रुविजयी च कुर्वन्ति ।

### 5.16. ग्रहाणां दिवा – रात्रि फलम्

रात्रि-दिवाबलपूर्णैः ग्रहैः पुरुषः भूमिं, गजः अश्वादि लाभः कारयति। ऐश्वर्यस्य अभिवृद्धिं करोति, शत्रुपक्षं मलिनयति, लक्ष्मीं च प्रददाति।

### 5.17. वर्षेशादिबलयुक्तग्रहाणां फलम् –

वर्षाधिपमासदिवसहोरेशाः क्रम परिवृद्धया द्विगुणा द्विगुणं सौख्यं, धनं, कीर्तिं च स्वदशासु फलं दद्यात्।

अर्थात् वर्षेशात् द्विगुणं फलं मासेशः ददाति । मासेशात् द्विगुणं दिवाधीशः । द्विवाधीशात् द्विगुणं होराधीशः स्व स्व दशायां सुखं, धनं, यशः कुर्वन्ति ।

### 5.18. पक्षबलयुक्त ग्रहफलम् –

पक्षबलेनयुक्तः ग्रहः शत्रुनाशं, रत्नं, वस्त्रं, हस्ति संपदं, सुवर्णं, भूमिलाभः कीर्तिं च प्रदानं कुर्वन्ति । तद्यथा-

**पक्षबलाद्रिपुनाशं रत्नाम्बरहस्तिसंपदं दद्युः ।**

**स्त्रीकनकभूमिलाभान्कीर्तिं च शशाङ्करधवलाम् ।।**

### 5.19. सर्वबलयुक्तग्रहाणां फलम् –

सकलबलसमेताः ग्रहाः सर्वदा राज्यं, सौख्यं, मनोरथात् अधिकं फलं प्रदद्युः ।

**सकलकरभारभारितनिर्मलकरजालभासुराः सततम् ।**

**राज्यं ग्रहाः प्रदद्युः सौख्यं च मनोरथातीतम् ।।**

### 5.20. बलयुक्तशुभग्रहफलम् –

यदा शुभग्रहः बलवान् भवति चेत् तदानिं पुरुषः आचारवान् सत्यवादी, पवित्रः, सुन्दरः तेजस्वी, मेधावी, द्विजदेवभक्ता, मालावस्त्रादिभूषणयुक्तः, जन प्रियश्च भवति ।

### 5.21. बलयुक्त - अशुभग्रहफलम्

यदा पाप ग्रहः बलयुक्तः तदानिं पुरुषः कुकर्म निरता, लोभी, दुःखी, निज कार्य निष्ठाः, साधु द्वेषिः, कलह प्रियः, अज्ञानी, क्रूराः मूर्खाः, मलिनाः, कृतघ्नाः, पिशुनाः, कुरुपाः भवन्ति ।

## 5.22. ग्रहाणां मित्रादिक्षेत्रसम्बन्धेन बलादि संज्ञा फलानि च –

| **क्षेत्राणि** | **संज्ञाः** | **फलम्** |
|---|---|---|
| स्वमित्रक्षेत्रसंस्थानं ग्रहाणां | बाल संज्ञा | सुखीः |
| स्वत्रिकोणगतानां ग्रहाणां | कुमार संज्ञा | सुशीलः |
| स्वोच्चसंस्थानां ग्रहाणां | युवराज संज्ञा | राजा |
| शत्रुक्षेत्रगतानां ग्रहाणां | वृद्धासंज्ञा | व्याधिः, ऋण वृद्धिः |
| नीचक्षेत्रगतानां ग्रहाणां | मरणसंज्ञा | मरण - व्ययम् |

## 5.23. ग्रहाणां पुंस्त्री गृह सम्बन्धेन शुभ फलम् –

यदि शुभ ग्रहः विषम राशौ गतः तर्हि पुरुषाः धीराः, बलवान्, बलिष्ठाः, सुकठोराः ,क्रूराः, मूर्खाश्च जायन्ते । एवमेव शुभ ग्रहाः सम राशौ गतश्चेत् पुरुषाः मृदवः, सङ्ग्राम भीरूकाः, जलकुसुमवस्त्रनिरताः, सौम्याः, सन्दराः, स्वजन हृष्टाः, प्रसन्नाः भवन्ति ।

## 5.24. बोधप्रश्नाः

1. सर्वबलयुक्तग्रहाणां फलानि विशदयत ।
2. ग्रहाणां मित्रादिक्षेत्रसम्बन्धेन बलादि संज्ञा फलानि च लिखत ।
3. पक्षबलयुक्तग्रहाणां फलं विवृणुत ।
4. राज्यप्रदयोगः लिखत ।
5. वक्रग्रहफलं लिखत ।
6. ग्रहाणां पुंस्त्री गृहसम्बन्धेन शुभाशुभ फलानि विशदयत ।
7. उच्चादिबलयुक्त ग्रहाणां फलं लिखत ।
8. स्वद्रेष्काणादिबलयुक्त ग्रहाणां फलानि लिखत ।
9. सर्वबलयुक्तग्रहाणां फलं विवृणुत ।

**षष्ठः खण्डः**

**योगकारकध्यायः**

**संरचना**

6.1. प्रस्तावना
6.2. लक्षिताधिगमविशेषाः
6.3. योगलक्षणम्
6.4. ग्रहाणां परस्परं योगकारकत्वलक्षणम्
6.5. योगकारक ग्रहाणां फलं महत्वश्च
6.6. बोधप्रश्नाः

**6.1. प्रस्तावना**

वस्तुतः विलक्षणोऽयं ग्रहयोगविज्ञानप्रकारः। अयं प्रकारः एवास्य ज्योतिषशास्त्रस्य मूलमिति। प्रायः सर्वेर्होरशास्त्रविचक्षणैरनुसन्धानस्य विविधप्रकारेण पलल्वनं विहितम्। यतो हि ग्रहणां योगायोगेन फलकथनमेव फलितज्यौतिषशास्त्रस्य तत्वमिति **ग्रहाधीनो भवेद्योगो योगाधीनं फलं यतः** (भा.प्र. 6/1)। अतः सर्वत्र ग्रहाणां फलकथनं प्रत्यक्षेण चमत्कारपूर्णं द्वश्यते।

सर्वप्रथमम् इदं जिज्ञासा जायते को नाम योगः तस्योत्तरं भवति **योजयन्तीति योगाः**। अस्य ज्ञानं जातकशास्त्रन्तर्गतं भवति। योगस्य व्युत्पत्त्यनुसारं सर्वविधप्रारब्धकर्मसु शुभाशुभफलयोजनमेव योगः यथोक्तं प्रश्नमार्गकारेण –

**ग्रहाणां स्थितिभेदेन पुरुषं योजयन्ति हि।**
**फलैः कर्म समुद्भूतैरिति योगाः प्रकीर्तिताः॥** (प्रश्नमार्गः – 9/48)

**6.3. योगलक्षणम् –**

जातकानां जन्मकालिक आकाशस्थभ्रमतां रव्यादिग्रहाणां तत्कालिकस्थितिभेदेन योगप्रकाराः निर्धार्यन्ते जन्मकुण्डल्यानुसारेण। जातकोऽयं पुरुषः स्त्री वा कस्मिन् समये भाग्योदयमुपयास्यति। शरीरसौख्यं पूर्णं न वेति। कदा राजा भविष्यति, भविष्यति चेद् अयं राजा दरिद्रो वा पण्डितो मुर्खो वा दुर्बलः सबलो वेति विविधप्रकारेण निरूपयन्ति दैवज्ञाः। प्रायः शास्त्रेऽस्मिन् सप्तप्रकारेण सम्बन्धेन योगाः भवन्ति। तद्यथा -

**स्थानतो भावतः खेटैः स्थानभावनभश्चरैः**
**स्थानभावसमायोगाद् भावखेचरयोगतः।** (प्र. मा. 9/49)

(1) स्थानसम्बन्धेन (2) भावसम्बन्धेन (3) ग्रहयोगसम्बन्धेन (4) स्थानभाव – ग्रहणांसम्बन्धेन
(5) स्थान-भावयोः सम्बन्धेन (6) भाव-ग्रहाणां च सम्बन्धेन ( 7) राशिग्रहाभ्यां च सम्बन्धेन ।

एवं सप्तविधसम्बन्धेन जातके शुभाशुभयोगानां विचारः क्रियते । वस्तुतः जन्मचक्रे आयुत्कृष्टग्रहस्थित्या योगेन वा राजा राजयोगः सम्भवति । राजयोगजाताः जातकाः धनिनः, राजानः, श्रेष्ठाः, प्रभावशालिनः, लोकप्रियाः, प्रसिद्धाश्च भवन्ति ।

### 6.4. ग्रहाणां परस्परं योगकारकलक्षणम् –

**स्वर्क्षत्रिकोणतुङ्गस्था यदि केन्द्रेषु संस्थिताः ।**
**अन्योन्यं कारकास्ते स्युः केन्द्रेष्वेव हरेर्मतम् ।।**


जन्मचक्रे ग्रहाः स्वक्षेत्रत्रिकोणस्वोच्चस्था यदि केन्द्रे संस्थिता तदा तेऽन्योन्यं कारकाः स्युः । एवमेव लग्नात् केन्द्रेष्वेव एवं स्युः तदा परस्परसम्बन्धेन कारकाः इति हरेर्मतम् ।

**उदाहरणम् -**

**रवितनयो जूकस्थः कुलीरलग्ने बृहस्पतिहिमांशू ।**
**मेषे कुजो गवि सितः परस्परं कारका एते ।।**

कर्कलग्ने गुरुः – चन्द्रश्च, शनिः तुलायां, मेषे कुजो रवियुतश्चेत् परस्परं कारकाः भवन्ति ।

**स्पष्टार्थं कुण्डलीम् उपस्थाप्यते**



- ❖ चाणक्यमतानुसारं स्वोच्चे, स्वमित्रे, स्वगृहे, स्वनवांशे स्थिता ग्रहाः कारकाः भवन्ति । चतुर्थ - दशम स्थाने स्थिता ग्रहाः परस्परं कारकाः भवन्ति न केन्द्रस्थ इति । विशेषतः दशम स्थाने सूर्यः प्रधान कारकः भवति ।
- ❖ लग्नस्थाः सुखसंस्था दशमस्थाश्चापि सर्वे कारकाः भवन्ति । एकादशेऽपि केचिद्वाञ्छन्ति तत् मुनीन्द्राणां मतं न । एकादशस्थानं गौण रुपेण स्वीक्रियते ।

### 6.5. योगकारक ग्रहाणां फलं महत्त्वश्च –

**नीचकूले संभूतः कारकविहगैः प्रधानतां याति ।**
**क्षितिपतिवंशसमुत्थो भवति नरेन्द्रो न सन्देहः ।।**
**कारकवेधो बलवान्मूलं योगेषु कीर्तितो हरिणा ।**
**तस्मात्फलनिर्देशः कारकवेधादिभिर्वाच्यः ।।**

शुभग्रहाणां स्थितिवशात् योगोत्पत्तिः भवति । अतेव जन्माङ्गचक्रे योगकारक ग्रहाणां स्थितिवशात् जातकः नीचकुलोत्पन्नः सन् प्रधानता याति एवं राज कुलोत्पन्नः राजा भवति इति न संदेहः ।

योगेषु करकवेधो बलवान्मूलं इति आचार्य हिरणा कथ्यते अतेव फलप्रवचनं कारक वेधादिभिः विचार्य कर्तव्यः ।

### 6.6. बोधप्रश्नाः

1. योगलक्षणं लिखत ।
2. योगकारक ग्रहाणां फलं महत्वश्च विशदयत ।
3. ग्रहाणां परस्परं योगकारकलक्षणं लिखत ।
4. भावानां केन्द्रादिसंज्ञाः निरुपयत ।
5. ग्रहाणां स्वामि लिखत ।
6. राशीनां वर्णविचारं स्पष्टयत ।
7. चरस्थिर उभयराशायः के ? लिखत ।
8. केन्द्र-पणफर–आपोक्लिमराशयः के ? लिखत ।
9. उपचय-अनुपचय-वर्गोत्तमराशयः के ? लिखत ।
10. कालपुरुषस्य अङ्गविभागं विशदयत ?

11.षड्वर्गाः के लिखत ?

12.लग्नादिद्वादशभावानां कारकत्वम् एवं संज्ञान्तराणि च लिखत।

13. मेषादिद्वादशराशीनां स्वरूपं विशदयत।

14.राशिनां नामानि विलिख्य तेषां स्वामिनः के इत्यपि लिखत।

15.तन्वादिद्वादशभावानां नामानि लिखत ?

**लघुप्रश्नाः**

1. सारावली ग्रन्थस्य कर्ता कः ?
2. मेषवृश्चिकयोः अधिपति कः ?
3. चरराशयः के ?
4. मिथुनस्य वर्णः कः ?
5. पाण्डुवर्णयुक्तराशिः कः ?
6. पूर्वदिशाराशयः के ?
7. दक्षिणदिशारशयः के ?
8. वृषभतुलयोः अधिपतिः कौ ?
9. सिंहराशेः अधिपतिः कः ?
10. चतुष्पदराशयः के ?
11. केन्द्रस्थानानि कानि ?
12. त्रिकोणस्थानानि कानि ?
13. सूर्यस्य उच्चनीचस्थानानि कानि ?
14. कुजस्य उच्चनीचस्थानानि कानि ?
15. सूर्यस्य मूलत्रिकोणराशिः कः ?
16. बुधस्य मूलत्रिकोणराशि कः ?
17. युग्मराशौ प्रथमहोरा कस्य ?
18. ओजराशो द्वितीयहोरा कस्य ?
19. द्रेष्काणे एकस्मिन् विभागे कति अंशाः सन्ति।
20. नवांशे एकस्मिन् अंशे कति भागाः भवन्ति।
21. वृश्चिकराशेः नवांशः कस्मिन् राशितः आरभ्यते ?

22. तुलाराशिः कस्य कस्य राशेः नवांशारम्भस्थानम् ?

23. पृष्ठोदयराशयः के ?

24. शीर्षोदयराशयः के ?

25. कालपुरुषस्य शिरः कः राशिः ?

26. कालपुरुषस्य मुखं कः राशिः ?

27. कालपुरुषस्य पादः कः राशिः ?

28. होराशब्दस्य व्युत्पत्तिः कः ?

29. त्रिस्कन्धाः के ?

30. अहोरात्रशब्देन कथं होरा भवति लिखत ।

31. होरा प्रमाणं किम् ?

32. एकस्मिन् राशौ कति होराः भवन्ति ?